# NAVAGRUHA STOTRAMS



***Book IX***

# INDEX


| SR NO | DETAILS | PAGE |
|---|---|---|
| 1 | Navagruha Stotra | 4 |
| 2 | Navagruha Mantra | 6 |
| 3 | Navagruha Pedda Hara Stotram | 8 |
| 4 | Sadhu Sankuli Tantra | 9 |
| 5 | Navagruha Karavalamba Stotram | 13 |
| 6 | Aaditya Hrudayam | 16 |
| 7 | Shri Soorya Stotram | 23 |
| 8 | Soorya Mandalaashtakam | 24 |
| 9 | Sooryashtakam | 26 |
| 10 | Soorya Namaskaram | 28 |
| 11 | Soorya Ashtothara Shata Namavali | 29 |
| 12 | Soorya Kavacham | 33 |
| 13 | Soorya Sahasranama Stotram | 38 |
| 14 | Soorya Kavacha Stotram | 55 |
| 15 | Chandra Ashtothara Shata Namavali | 56 |
| 16 | Chandra Kavacham | 60 |
| 17 | Ankaraka Ashtothara Shata Namavali | 61 |
| 18 | Ankaraka Stotram | 65 |
| 19 | Mangala Kavacham | 66 |
| 20 | Hrunamochaka Mangala Stotram | 67 |
| 21 | Budha Panchavimshatinama Stotram | 69 |
| 22 | Budha Ashtothara Shata Namavali | 70 |
| 23 | Bhuda Kavacham | 74 |
| 24 | Brahaspati Stotram | 75 |
| 25 | Guru Ashtothara Shata Namavali | 76 |
| 26 | Brahaspati Kavacham | 80 |
| 27 | Shukra Ashtothara Shata Namavali | 81 |
| 28 | Shukra Kavacham | 85 |
| 29 | Shri Shanaischara Mala Mantra | 86 |
| 30 | Shanaishcharastavaraja | 88 |
| 31 | Shanaischara Stotram | 92 |

| | | |
|---|---|---|
| 32 | Shani Ashtothara Shata Namavali | 94 |
| 33 | Shani Vajra Panchara Kavacham | 98 |
| 34 | Rahu Ashtothara Shata Namavali | 100 |
| 35 | Rahu Kavacham | 104 |
| 36 | Rahu Stotram | 105 |
| 37 | Ketu Ashtothara Shata Namavali | 106 |
| 38 | Ketu Kavacham | 110 |




**********

*Compiled By Shri N K Venkitaraman.*

*********

[ For a free copy of printable PDF file
write to nkv.nvr@gmail.com ]

(All texts have been carefully proof-read. Every effort has been made to ensure that no errors exist in these texts. If you find an error, please report it so that it can be corrected.)

# ॥ नवग्रहस्तोत्र ॥

जपाकुसुमसंकाशं काश्यपेयं महद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥

I pray to the Sun, the day-maker, destroyer of all sins, the enemy of darkness, of great brilliance, the descendent of KAshyapa, the one who shines like the japA flower .

दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ २ ॥

I pray to the Moon who shines coolly like curds or a white shell, who arose from the ocean of milk, who has a hare on him, Soma, who is the ornament of Shiva's hair .

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ३ ॥

I pray to Mars, born of Earth, who shines with the same brilliance as lightning, the young man who carries a spear .

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥

I pray to Mercury, dark like the bud of millet, of unequalled beauty, gentle and agreeable .

देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥

I pray to Jupiter, the teacher of gods and rishis, intellect incarnate, lord of the three worlds .

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥

I pray to Venus, the utimate preceptor of demons, promulgator of all learning, he who shines like the fiber of snow-white jasmine .

नीलांजनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥

I pray to Saturn, the slow moving, born of Shade and Sun, the elder brother of Yama, the offspring of Sun, he who has the appearance of black collyrium .

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥

I pray to Rahu, having half a body, of great bravery, the eclipser of the Moon and the Sun, born of SimhikA .

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥

I pray to Ketu, who has the appearance of PalAsha flower, the head of stars and planets, fierce and terrifying .

इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ॥ १० ॥

Those who read the song sung by VyAsa, will be joyous, sovereign and powerful, and will succeed in appeasing obstacles, occurring by day or by night .

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥

Bad dreams of men, women and kings alike will be destroyed and they will be endowed with unparalleled riches, good health and enhancing nourishment .

गृहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥

All the pain, devastation caused by fire, planets and stars will be of the past, so spoke VyAsa, emphatically .

॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥

Thus ends the song of praise of the nine planets composed by VyAsa .

# ॥ नवग्रहमन्त्रः ॥

श्रीगणेशाय नमः ।

अथ सूर्यस्य मन्त्रः –

विश्वनाथसारोद्धारे

ॐ ह्सौः श्रीं आं ग्रहाधिराजाय आदित्याय स्वाहा ॥

अथ चन्द्रस्य मन्त्रः –

कालीपटले

ॐ श्रीं क्रीं ह्रां चं चन्द्राय नमः ॥

अथ भौमस्य मन्त्रः –

शारदाटीकायाम्

ऐं ह्सौः श्रीं द्रां कं ग्रहाधिपतये भौमाय स्वाहा ॥

अथ बुधस्य मन्त्रः –

स्वतन्त्रे

ॐ ह्रां क्रीं टं ग्रहनाथाय बुधाय स्वाहा ॥

अथ जीवस्य मन्त्रः –   त्रिपुरातिलके

ॐ ह्रीं श्रीं ख्रीं ऐं ग्लौं ग्रहाधिपतये
बृहस्पतये ब्रींठः ऐंठः श्रींठः स्वाहा ॥

अथ शुक्रस्य मन्त्रः -

आगमशिरोमणौ

ॐ ऐं जं गं ग्रहेश्वराय शुक्राय नमः ॥

अथ शनैश्चरस्य मन्त्रः -

आगमलहर्याम्

ॐ ह्रीं श्रीं ग्रहचक्रवर्तिने शनैश्चराय क्लीं ऐंसः स्वाहा ॥

अथ राहोर्मन्त्रः -

आगमलहर्याम्

ॐ क्रीं क्रीं हूँ हूँ टं टङ्कधारिणे
राहवे रं ह्रीं श्रीं भैं स्वाहा ॥

अथ केतु मन्त्रः -

मन्त्रमुक्तावल्याम्

ॐ ह्रीं क्रूं क्रूररूपिणे केतवे ऐं सौः स्वाहा ॥

॥ इति नवग्रहमन्त्रः सम्पूर्णम् ॥

# ॥ नवग्रहपीडाहरस्तोत्रम् ॥

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।
विषमस्थानसंभूतां पीडां हरतु मे रविः ॥ १ ॥
रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः ।
विषमस्थानसंभूतां पीडां हरतु मे विधुः ॥ २ ॥
भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।
वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु मे कुजः ॥ ३ ॥
उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥ ४ ॥
देवमन्त्री विशालाक्षः सदा लोकहिते रतः ।
अनेकशिष्यसंपूर्णः पीडां हरतु मे गुरुः ॥ ५ ॥
दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ।
प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः ॥ ६ ॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्दचारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥ ७ ॥
महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः ।
अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी ॥ ८ ॥
अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः ।
उत्पातरूपो जगतां पीडां हरतु मे तमः ॥ ९ ॥

॥ इति ब्रह्माण्डपुराणोक्तं नवग्रहपीडाहरस्तोत्रं संपूर्णम् ॥

## ॥ साधुसङ्कुलि तन्त्र ॥

ग्रहपुरश्चरण प्रयोगः

ॐ रक्तपद्मासनं देवं चतुर्बाहुसमन्वितम् ।
क्षत्रियं रक्तवर्णञ्च गोत्रं काश्यपसम्भवं ॥
सप्ताश्वरथमारूढं प्रचण्डं सर्वसिद्धिदम् ।
द्विभुजं रक्तपद्मैश्च संयुक्तं प्र्माद्भुतं ॥
कलिञ्गदेशजं देवं मौलिमाणिक्यभूषणम् ।
त्रिनेत्रं तेजसा पूर्णमुदयाचलसंस्थितं ॥
द्वादशाञ्गुल-विस्तीर्णं प्रबरं घृतकौशिकम् ।
शिवाधिदैवं पुर्वास्यं ब्रह्मप्रत्यधिदैवतं ॥

**क्लीं ऐं श्रीं ह्वीं सूर्याय नमः**

ॐ शुक्लं शुक्लाम्बरधरं श्वेताब्जस्थं चतुर्भुजम् ।
हारकेयूरनूपुरैर्मण्डितं तमसापहं ॥
सुखदृश्यं सुधायुक्त-मात्रेयं वैश्यजातिजम् ।
कलङ्काङ्कितसर्वाञ्गं केशपाशातिसुन्दरं ॥
मुकुटेर्मणिमाणिक्यैः शोभनीयन्तु लोचनम् ।
योषित्प्रियं महानन्दं यमुनाजलसम्भवं ॥
उमाधिदैवतं देवमापप्रत्यधिदैवतं ॥

**ह्वीं ह्वीं हुं सोमाय स्वाहा**

ॐ मेषाधिरूढं द्विभुजं शक्तिचापधरं मुदा ।
रक्तवर्णं महातेजं तेजस्विनां समाकुलं ॥
रक्तवस्त्रपरिधानाम् नानालङ्कारसंयुतम् ।
रक्ताङ्गं धरणीपुत्रं रक्तमाल्यानुलेपनं ॥
हस्ते वराहदशनं पृष्ठे तूणसमन्वितम् ।
कटाक्षाद् भीतिजनकं महामोहप्रदं महत् ॥
महाचापधरं देवं महोग्रमूग्रविग्रहम् ।
स्कन्धादिदैवं सूर्यास्यं क्षितिप्रत्यधिदैवतं ॥

## ह्रीं ॐ ऐं कुजाय स्वाहा

ॐ सुतप्तस्वर्णाभतनुं रोमराजिविराजितम् ।
द्विभुजं स्वर्नदण्डेव शरच्चन्द्रनिभाननं ॥
चरणे रत्नमञ्जीरं कुमारं शुभलक्षणम् ।
स्वर्णयज्ञयोपबीतञ्च पीतवस्त्रयुगाबृतं ॥
अत्रिगोत्रसमुत्पन्नं वैश्यजातिं महाबलम् ।
मागधं महिमापूर्णं द्विनेत्रं द्विभुजं शुभं ॥
नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम् ।
चिन्तयेत् सोमतनयं सर्वाभिष्टफलप्रदं ॥

## ॐ क्लीं ॐ बुधाय स्वाहा

ॐ कनकरुचिरगोरं चारुमूर्तिं प्रसन्नं
द्विभुजमपि सरजौ संदधानं सुरेज्यम् ।
वसनयुगदधानं पीतवस्त्रं सुभद्रं
सुरवरनरपुज्यमङ्गिरोगोत्रयुक्तम् ।
द्विजबरकुलजातं सिन्धुदेशप्रसिद्धं
त्रिजगति गणश्रेस्ठश्चाधिदैवं तदीयम् ।
सकलगिरिनिहन्ता इन्द्रः प्रत्यधिदैवं
ग्रहगणगुरुनाथं तं भजेऽभिष्टसिद्धौ ।

## रं यं ह्रीं ऐं गुरवे नमः

ॐ शुक्लाम्बरं-शुक्लरुचिं सुदीप्तम् ।
तुषारकुन्देन्दुद्युतिं चतुर्भुजं ॥
इन्द्राधिदैवं शचीप्रत्यधिदैवम् ।
वेदार्थविज्ञं च कविं कवीनां ॥
भृगुगोत्रयुक्तं द्विजजातिमात्रम् ।
दितीन्द्रपूज्यं खलु शुद्धिशान्तं ॥
सर्वार्थसिद्धिप्रदमेव काव्यम् ।
भजेऽप्यहं भोजकतोद्भवं भृगुं ॥

## हुं हुं श्रीं श्रीं नं रं शुक्राय स्वाहा

ॐ सोरिं गृध्रगतातिकृष्णवपुषं  कालाग्निवत् सङ्कुलम् ।
संयुक्तं भुजपल्लवैरुपलजस्तम्भैश्चतुर्भिः समैः ॥
भीमं चोग्रमहाबलातिवपुषं बाधागणैः संयुतम् ।
गोत्रं काश्यपजं सुराष्ट्रविभवं कालाग्निदैवं शनिं ॥
वस्त्रैः कृष्णमर्युतं तनुबरं तं सूर्यसूनुं भजे ॥

**ह्रीं क्लीम् शनैश्चराय नमः**

ॐ महिषस्थं कृष्णं वदनमयविभुं कर्णनासाक्षिमात्रम् ।
कारालास्यं भीमं गदविभवयुतं श्यामवर्णं महोग्रं ॥
पैठीनं गोत्रयुक्तं रविशशीदमनं चाधिदैवं यमोऽपि ।
सर्पप्रत्यधिदैवं मलयगिरिभवं तं तमसं नमामि ॥

**बं ऐं बं बं क्लीं बं तमसे स्वाहा**

ॐ महोग्रं धूमाभं करचरणयुतं छिन्नशीर्षं सुदीप्तम् ।
हस्ते वाणं कृपाणं त्रिशिखशशिधृतं वेदहस्तं प्रसन्नं ॥
ब्रह्मा तस्याधिदैवं सकलगदयुतं सर्पप्रत्यधिदैवं ध्यायेत् ।
केतुं विशालं सकलसुरनरे शान्तिदं पुष्टिदञ्च ॥

**श्रीं श्रीं आं बं रं लं केतवे स्वाहा**

# ॥ नव ग्रह करावलम्ब स्तोत्रम् ॥

ज्योतीश देव भुवनत्रय मूलशक्ते
गोनाथ भासुर सुरादिभिरीद्यमान ।
नृणांश्च वीर्य वर दायक आदिदेव
आदित्य वेद्य मम देहि करावलम्बम् ॥ १ ॥

नक्षत्रनाथ सुमनोहर शीतलांशो
श्री भार्गवी प्रिय सहोदर श्वेतमूर्ते ।
क्षीराब्धिजात रजनीकर चारुशील
श्रीमच्छशांक मम देहि करावलम्बम् ॥ २ ॥

रुद्रात्मजात बुधपूजित रौद्रमूर्ते
ब्रह्मण्य मंगल धरात्मज बुद्धिशालिन् ।
रोगार्तिहार ऋणमोचक बुद्धिदायिन्
श्री भूमिजात मम देहि करावलम्बम् ॥ ३ ॥

सोमात्मजात सुरसेवित सौम्यमूर्ते
नारायणप्रिय मनोहर दिव्यकीर्ते ।

धीपाटवप्रद सुपंडित चारुभाषिन्
श्री सौम्यदेव मम देहि करावलम्बम् ॥ ४ ॥

वेदान्तज्ञान श्रुतिवाच्य विभासितात्मन्
ब्रह्मादि वन्दित गुरो सुर सेवितांघ्रे ।
योगीश ब्रह्म गुण भूषित विश्व योने
वागीश देव मम देहि करावलम्बम् ॥ ५ ॥

उल्हास दायक कवे भृगुवंशजात
लक्ष्मी सहोदर कलात्मक भाग्यदायिन् ।
कामादिरागकर दैत्यगुरो सुशील
श्री शुक्रदेव मम देहि करावलम्बम् ॥ ६ ॥

शुद्धात्म ज्ञान परिशोभित कालरूप
छायासुनन्दन यमाग्रज क्रूरचेष्ट ।
कष्टाद्यनिष्ठकर धीवर मन्दगामिन्
मार्तंडजात मम देहि करावलम्बम् ॥ ७ ॥

मार्तंड पूर्ण शशि मर्दक रौद्रवेश
सर्पाधिनाथ सुरभीकर दैत्यजन्म ।
गोमेधिकाभरण भासित भक्तिदायिन्
श्री राहुदेव मम देहि करावलम्बम् ॥ ८ ॥

आदित्य सोम परिपीडक चित्रवर्ण
हे सिंहिकातनय वीर भुजंग नाथ ।
मन्दस्य मुख्य सख धीवर मुक्तिदायिन्
श्री केतु देव मम देहि करावलम्बम् ॥ ९ ॥

मार्तंड चन्द्र कुज सौम्य बृहस्पतीनाम्
शुक्रस्य भास्कर सुतस्य च राहु मूर्तेः ।
केतोश्च यः पठति भूरि करावलम्ब
स्तोत्रम् स यातु सकलांश्च मनोरथारान् ॥ १० ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ ॐ तत् सत् ॥

# ॥ अथ आदित्यहृदयम् ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥ २ ॥

Rama, exhausted and about to face Ravana ready for a fresh battle was lost deep in contemplation. The all knowing sage agastya who had joined the gods to witness the battle spoke to Rama thus .. 1,2

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३ ॥

Oh Rama, mighty-armed Rama, listen to this eternal secret which will help you destroy all your enemies in battle. 3

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षयं परमं शिवम् ॥ ४ ॥

This holy hymn dedicated to the Sun deity will result in destroying all enemies and bring you victory and never ending supreme bliss. 4

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिंताशोकप्रशमनं आयुर्वर्धनमुत्तमम् ॥ ५ ॥

This hymn is supreme and is a guarantee of complete prosperity and is the destroyer of sin, anxiety, anguish and is the bestower of longevity. 5

रश्मिमंतं समुद्यन्तं देवासुरनमस्कृतम्।

पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥ ६॥

Worship the One, possessed of rays when he has completely risen, held in reverence by the devas and asuras, and who is the Lord of the universe by whose efflugence all else brighten. 6

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।

एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥ ७॥

He indeed represent the totality of all celestial beings. He is self-luminous and sustains all with his rays. He nourishes and energizes the inhabitants of all the worlds and the race of Devas and Asuras. 7

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।

महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः॥ ८॥

He is Brahma, Vishnu, Shiva, Skands, Prajapati. He is also Mahendra, kubera, kala, yama, soma and varuna. 8

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः।

वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः॥ ९॥

He is the pitrs, vasus, sadhyas, aswini devas, maruts, manu, vayu, agni, prana and, being the source of all energy and light, is the maker of all the six seasons. 9

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।

सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥ १०॥

He is the son of Aditi, creator of the universe, inspirer of action, transverser of the heavens. He is the sustainer, illumination of all directions, the golden hued brilliance and is the maker of the day. 10

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शंभुस्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥

He is the Omnipresent One who pervades all with countless rays. He is the power behind the seven sense organs, the dispeller of darkness, bestower of happiness and prosperity, the remover of misfortunes and is the infuser of life. 11

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥

He is the primordial BEing manifesting as the Trinity. He ushers in the Day and is the teacher (of Hiranyagarbha), the fire-wombed, the son of Aditi, and has a vast and supreme felicity. He is the remover of intellectual dull-headedness. 12

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः ॥ १३ ॥

He is the Lord of the firmament, dispeller of darkness. Master of all the vedas, he is a friend of the waters and causes rain. HE has crossed the vindya range and sports in the Brahma Nadi. 13

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥ १४ ॥

He, whose form is circular and is colored yellow, is intensely absorbed and inflicts death. He is the destroyer of all and is the Omniscient one being exceedingly energetic sustains the universe and all action. 14

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५ ॥

He is the lord of stars, planets and all constellations. He is the origin of everything in the universe and is the cause of the lustre of even the brilliant ones. Salutations to Thee who is the One being manifest in the twelve forms of the Sun. 15

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।

ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥

Salutations to the Eastern and western mountain, Salutations to the Lord of the stellar bodies and the Lord of the Day. 16

जयाय जयभद्राय हर्यश्वाय नमो नमः ।

नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥

Salutations to the One who ordains victory and the prosperity that follows. Salutations to the one possessed of yellow steeds and to the thousand rayed Lord, and to Aditya. 17

नम उग्राय वीराय सारङ्गाय नमो नमः ।

नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥ १८ ॥

Salutations to the Terrible one, the hero, the one that travels fast. Salutations to the one whose emergence makes the lotus blossom and to the fierce and omnipotent one. 18

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

Salutations to the Lord of Brahma, shiva and Achyuta, salutations to the powerful and to the effulgence in the Sun that is both the illuminator and devourer of all and is of a form that is fierce like Rudra. 19

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥

Salutations to he transcendental atman that dispels darkness, drives away all fear, and destroys all foes. Salutations also to the annihilator of the ungrateful and to the Lord of all the stellar bodies. 20

तप्तचामीकराभाय वह्नये विश्वकर्मणे

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥

Salutations to the Lord shining like molten gold, to the transcendental fire, the fire of supreme knowledge, the architect of the universe, destroyer of darkness and salutations again to the effulgence that is the Cosmic witness. 21

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥

Salutations to the Lord who destroys everything and creates them again. Salutations to Him who by His rays consumes the waters, heats them up and sends them down as rain. 22

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।

एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥

Salutations to the Lord who abides in the heart of all beings keeping awake when they are asleep. He is both the sacrificial fire and the fruit enjoyed by the worshippers. 23

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।

यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

The Sun is verily the Lord of all action in this universe. He is verily the vedas, the sacrifices mentioned in them and the fruits obtained by performing the sacrifices. 24

## ॥ फल श्रुतिः ॥

**एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।**

**कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥**

Raghava, one who recites this hymn in times of danger, during an affliction or when lost in the wilderness and having fear, he will not lose heart (and become brave). 25

**पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।**

**एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥**

Raghava, worship this Lord of all Gods and the Universe with one-pointed devotion. Recite this hymn thrice and you will win this battle.

**अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ।**

**एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥ २७ ॥**

O mighty armed one, you shall truimph over Ravana this very moment. Having spoken this, Agastya returned his original place. 27

**एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।**

**धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥**

Raghava became free from worry after hearing this. He was greatly pleased and became brave and energetic. 28

**आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।**

**त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥**

Gazing at the sun with devotion, He recited this hymn thrice and experienced bliss. Purifying Himself by sipping water thrice, He took up His bow with His mighty arms. 29

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्।
सर्वं यत्नेन महता वधे तस्य धृतोऽभवत्॥ ३० ॥

Seeing Ravana coming to fight, He put forth all his effort with a determination to destroy Ravana. 30

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

Then knowing that the destruction of the lord of prowlers at night (Ravana) was near, Aditya, who was at the center of the assembly of the Gods, looked at Rama and exclaimed 'Hurry up' with great delight. 31

॥ इति आदित्यहृदयम् मंत्रम्॥

# ॥ श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं ॥

॥ श्रीगुरुभ्यो नमः ॥  ॥ ॐ श्रीमहागणाधिपतये नमः ॥

ॐ नमो भगवते आदित्यायाखिलजगतां आत्मस्वरूपेण
कालस्वरूपेण चतुर्विधभूत-निकायानां ब्रह्मादिस्तम्भ-पर्यन्तानां
अन्तर्हृदयेषु बहिरपि चाकाश इव उपाधिनाऽव्यवधीयमानो
भवानेक एव क्षणलव-निमेषावयवोपचित-संवत्सरगणेन
अपा-मादान-विसर्गाभ्यां इमां लोकयात्रां  अनुवहति ॥ १
यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनं अहरहः
आम्नायविधिना उपतिष्ठमानानां अखिल-दुरित-
वृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ २
य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मन-
इन्द्रियासुगणान् अनात्मनः स्वयमात्मा अन्तर्यामी प्रचोदयति ॥
य एवेमं लोकं अतिकराल-वदनान्धकार-संज्ञा-जगरग्रह-गिलितं
मृतकमिव विचेतनं अवलोक्य अनुकम्पया परमकारुणिकः ईक्षयैव
उत्थाप्य अहरहरनुसवनं  श्रेयसि स्वधर्माख्यात्मावस्थाने
प्रवर्तयति अवनिपतिरिव असाधूनां भयमुदीरयन्नटति ॥ ४
परित आशापालैः तत्र तत्र कमलकोशाञ्जलिभिः उपहृतार्हणः ॥ ५
अथह भगवन् तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितं
अहं अयातयामयजुःकामः उपसरामीति ॥  ६
एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ ७

॥ इति श्रीमद्भागवते द्वादशस्कन्धे श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं संपूर्णम् ॥

# ॥ सूर्यमंडलाष्टकं ॥

नमः सवित्रे जगदेकचक्षुषे । जगत्प्रसूती स्थिति नाश हेतवे ।
त्रयीमयाय त्रिगुणात्म धारिणे । विरञ्चि नारायण शङ्करात्मन् ॥ १

यन्मण्डलं दीप्तिकरं विशालं । रत्नप्रभं तीव्रमनादि रूपम् ।
दारिद्र्य दुखक्षयकारणं च । पुनातु मां तत्सवितुर्वरेण्यम् ॥ २

यन्मण्डलं देव गणैः सुपूजितं । विप्रैः स्तुतं भावनमुक्ति कोविदम् ।
तं देवदेवं प्रणमामि सूर्यं । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ३

यन्मण्डलं ज्ञान घनं त्वगम्यं । त्रैलोक्य पूज्यं त्रिगुणात्म रूपम् ।
समस्त तेजोमय दिव्यरूपं । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ४

यन्मण्डलं गुढ़मति प्रबोधं । धर्मस्य वृद्धिं कुरुते जनानाम् ।
यत्सर्व पाप क्षयकारणं च । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ५

यन्मण्डलं व्याधि विनाश दक्षं । यदृग्यजुः सामसु संप्रगीतम् ।
प्रकाशितं येन भूर्भुवः स्वः । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ६ ॥

यन्मण्डलं वेदविदो वदन्ति । गायन्ति यच्चारण सिद्ध सङ्घाः ।
यद्योगिनो योगजुषां च सङ्घाः । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ७

यन्मण्डलं सर्वजनेषु पूजितं । ज्योतिश्चकुर्यादिह मर्त्यलोके ।
यत्कालकल्प क्षयकारणं च । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ८

यन्मण्डलं विश्वसृजं प्रसीदमुत्पत्तिरक्षा प्रलय प्रगल्भम् ।
यस्मिञ्जगत्संहरतेऽखिलं च । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ९

यन्मण्डलं सर्वगतस्य विष्णोरात्मा । परं धाम विशुद्धतत्त्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्ये । पुनातु मां तत्सवितुर्वरेण्यम् ॥ १० ॥

यन्मण्डलं वेदविदो विदन्ति । गायन्ति तच्चारणसिद्ध सङ्घाः ।
यन्मण्डलं वेदविदो स्मरन्ति । पुनातु मां तत्सवितुर्वरेण्यम् ॥ ११

यन्मण्डलं वेदविदोपगीतं । यद्योगिनां योग पथानुगम्यम् ।
तत्सर्व वेदं प्रणमामि सूर्यं । पुनातु मां तत्सवितुर्वरेण्यम् ॥ १२ ॥

The metre structure of each shloka is:
11 - 11 . --
11 - 11 .. ---
where the numbers indicate the number of syllables
and the dashes the relative pause required;
a rather straightforward metre.
Also note the recurring `tatsaviturvareNyam.h'
of the gAyatri mantra;
this is after all a hymn to the Sun!

# ॥ सूर्याष्टकम् ॥

॥ श्री गणेशाय नमः ॥

साम्ब उवाच ॥

आदिदेवं नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते ॥ १ ॥

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ २ ॥

लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ३ ॥

त्रैगुण्यं च महाशूरं ब्रह्माविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ४ ॥

बृंहितं तेजःपुंजं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥ ५ ॥

बन्धूकपुष्पसंकाशं हारकुंडलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ६ ॥

तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ७ ॥

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ८ ॥

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।
अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् ॥ ९ ॥

आमिशं मधुपानं च यः करोति रवेर्दिने ।
सप्तजन्म भवेद्रोगी प्रतिजन्म दरिद्रता ॥ १० ॥

स्त्रीतैलमधुमांसानि यस्त्यजेत्तु रवेर्दिने ।
न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥ ११ ॥

इति श्री सूर्याष्टकस्तोत्रं संपूर्णम् ॥

# ॥ सूर्य नमस्कारम् ॥

ॐ ध्येयः सदा सवितृमण्डल मध्यवर्ति ।
नारायणः सरसिजासन्संइविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी ।
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥

ॐ मित्राय नमः । ॐ रवये नमः । ॐ सूर्याय नमः ।
ॐ भानवे नमः । ॐ खगाय नमः । ॐ पूष्णे नमः ।
ॐ हिरण्यगर्भाय नमः । ॐ मरीच्चये नमः । ॐ आदित्याय नमः ।
ॐ सवित्रे नमः । ॐ अर्काय नमः । ॐ भास्कराय नमः ।
ॐ श्री सवितृ सूर्यनारायणाय नमः ॥

आदितस्य नमस्कारान् ये कुर्वन्ति दिने दिने ।
जन्मान्तर सहस्रेषु दारिद्र्यं दोष नाशते ।
अकालमृत्यु हरणं सर्वव्याधि विनाशनम् ।
सूर्यपादोदकं तीर्थं जठरे धारयाम्यहम् ।
योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन ।
योपाकरोत्तं प्रवरं मुनीनां पतंजलिं प्रांजलिरानतोऽस्मि ॥

# ॥ श्री सूर्य अष्टोत्तरशतनामावलिः ॥

सूर्यं सुन्दर लोकनाथममृतं वेदान्तसारं शिवम्
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ॥
इन्द्रादित्य नराधिपं सुरगुरुं त्रैलोक्यचूडामणिम्
ब्रह्मा विष्णु शिव स्वरूप हृदयं वन्दे सदा भास्करम् ॥

## सूर्य बीज मन्त्र -

## ॐ ह्राँ ह्रीं ह्रौं सः सूर्याय नमः ॥

ॐ अरुणाय नमः ।
ॐ शरण्याय नमः ।
ॐ करुणारससिन्धवे नमः ।
ॐ असमानबलाय नमः ।
ॐ आर्तरक्शकाय नमः ।
ॐ आदित्याय नमः ।
ॐ आदिभूताय नमः ।
ॐ अखिलागमवेदिने नमः ।
ॐ अच्युताय नमः ।
ॐ अखिलज्ञाय नमः ॥ १० ॥
ॐ अनन्ताय नमः ।
ॐ इनाय नमः ।
ॐ विश्वरूपाय नमः ।
ॐ इज्याय नमः ।
ॐ इन्द्राय नमः ।
ॐ भानवे नमः ।

ॐ इन्दिरामन्दिराप्ताय नमः।

ॐ वन्दनीयाय नमः।

ॐ ईशाय नमः।

ॐ सुप्रसन्नाय नमः॥ २० ॥

ॐ सुशीलाय नमः।

ॐ सुवर्चसे नमः।

ॐ वसुप्रदाय नमः।

ॐ वसवे नमः।

ॐ वासुदेवाय नमः।

ॐ उज्ज्वलाय नमः।

ॐ उग्ररूपाय नमः।

ॐ ऊर्ध्वगाय नमः।

ॐ विवस्वते नमः।

ॐ उद्यत्किरणजालाय नमः॥ ३०

ॐ हृषीकेशाय नमः।

ॐ ऊर्जस्वलाय नमः।

ॐ वीराय नमः।

ॐ निर्जराय नमः।

ॐ जयाय नमः।

ॐ ऊरुद्वयाभावरूपयुक्तसारथये नमः

ॐ ऋषिवन्द्याय नमः।

ॐ रुग्घन्त्रे नमः।

ॐ ऋक्शाचक्रचराय नमः।

ॐ ऋजुस्वभावचित्ताय नमः॥४०

ॐ नित्यस्तुत्याय नमः।

ॐ ऋकारमातृकावर्णरूपाय नमः।

ॐ उज्ज्वलतेजसे नमः।

ॐ ऋक्शाधिनाथमित्राय नमः।

ॐ पुष्कराक्शाय नमः।

ॐ लुप्तदन्ताय नमः।

ॐ शान्ताय नमः।

ॐ कान्तिदाय नमः।

ॐ घनाय नमः ।
ॐ कनत्कनकभूषाय नमः ॥ ५०
ॐ खद्योताय नमः ।
ॐ लूनिताखिलदैत्याय नमः ।
ॐ सत्यानन्दस्वरूपिणे नमः ।
ॐ अपवर्गप्रदाय नमः ।
ॐ आर्तशरण्याय नमः ।
ॐ एकाकिने नमः ।
ॐ भगवते नमः ।
ॐ सृष्टिस्थित्यन्तकारिणे नमः ।
ॐ गुणात्मने नमः ।
ॐ घृणिभृते नमः ॥ ६०
ॐ बृहते नमः ।
ॐ ब्रह्मणे नमः ।
ॐ ऐश्वर्यदाय नमः ।
ॐ शर्वाय नमः ।
ॐ हरिदश्वाय नमः ।
ॐ शौरये नमः ।
ॐ दशदिक्संप्रकाशाय नमः ।
ॐ भक्तवश्याय नमः ।
ॐ ओजस्कराय नमः ।
ॐ जयिने नमः ॥ ७०
ॐ जगदानन्दहेतवे नमः ।
ॐ जन्ममृत्युजराव्याधिवर्जिताय नमः ।
ॐ उच्चस्थान समारूढरथस्थाय नमः ।
ॐ असुरारये नमः ।
ॐ कमनीयकराय नमः ।
ॐ अब्जवल्लभाय नमः ।
ॐ अन्तर्बहिः प्रकाशाय नमः ।
ॐ अचिन्त्याय नमः ।
ॐ आत्मरूपिणे नमः ।
ॐ अच्युताय नमः ॥ ८० ॥
ॐ अमरेशाय नमः ।
ॐ परस्मै ज्योतिषे नमः ।
ॐ अहस्कराय नमः ।
ॐ रवये नमः ।
ॐ हरये नमः ।
ॐ परमात्मने नमः ।

ॐ तरुणाय नमः ।
ॐ वरेण्याय नमः ।
ॐ ग्रहाणांपतये नमः ।
ॐ भास्कराय नमः ॥ ९०
ॐ आदिमध्यान्तरहिताय नमः ।
ॐ सौख्यप्रदाय नमः ।
ॐ सकलजगतांपतये नमः ।
ॐ सूर्याय नमः ।
ॐ कवये नमः ।
ॐ नारायणाय नमः ।
ॐ परेशाय नमः ।
ॐ तेजोरूपाय नमः ।
ॐ श्रीं हिरण्यगर्भाय नमः ।
ॐ ह्रीं सम्पत्कराय नमः ॥ १००
ॐ ऐं इष्टार्थदायनमः ।
ॐ अनुप्रसन्नाय नमः ।
ॐ श्रीमते नमः ।
ॐ श्रेयसेनमः ।
ॐ भक्तकोटिसौख्यप्रदायिने नमः ।
ॐ निखिलागमवेद्याय नमः ।
ॐ नित्यानन्दाय नमः ।
ॐ सूर्याय नमः ॥ १०८ ॥

॥ इति सूर्य अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

---

Propitiation of the Sun (Sunday)
CHARITY: Donate wheat, or sugar candy to a middle aged male government leader at 12:00 noon on a Sunday.
FASTING: On Sundays, especially during Sun transits and major or minor Sun periods.
MANTRA: To be chanted on Sunday morning at sunrise, especially during Sun transits and major or minor sun periods:
RESULT: The planetary diety Surya is propitiated increasing courage and notoriety.

# ॥ सूर्यकवच ॥

श्रीभैरव उवाच

यो देवदेवो भगवान् भास्करो महसां निधिः ।
गयत्रीनायको भास्वान् सवितेति प्रगीयते ॥ १ ॥
तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वमन्त्रमयं गुह्यं मूलविद्यारहस्यकम् ॥ २ ॥
सर्वपापापहं देवि दुःखदारिद्र्यनाशनम् ।
महाकुष्ठहरं पुण्यं सर्वरोगनिवर्हणम् ॥ ३ ॥
सर्वशत्रुसमूहघ्नं सम्ग्रामे विजयप्रदम् ।
सर्वतेजोमयं सर्वदेवदानवपूजितम् ॥ ४ ॥
रणे राजभये घोरे सर्वोपद्रवनाशनम् ।
मातृकावेष्टितं वर्म भैरवाननिर्गतम् ॥ ५ ॥
ग्रहपीडाहरं देवि सर्वसङ्कटनाशनम् ।
धारणादस्य देवेशि ब्रह्मा लोकपितामहः ॥ ६ ॥
विष्णुर्नारायणो देवि रणे दैत्याञ्जिष्यति ।
शङ्करः सर्वलोकेशो वासवोऽपि दिवस्पतिः ॥ ७ ॥
ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः ।
मन्त्रात्मकं परं वर्म सवितुः सारमुत्तमम् ॥ ८ ॥
यो धारयेद् भुजे मूर्ध्नि रविवारे महेश्वरि ।

स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥ ९ ॥
बहुनोक्तेन किं देवि कवचस्यास्य धारणात् ।
इह लक्ष्मीधनारोग्य-वृद्धिर्भवति नान्यथा ॥ १० ॥
परत्र परमा मुक्तिर्देवानामपि दुर्लभा ।
कवचस्यास्य देवेशि मूलविद्यामयस्य च ॥ ११ ॥
वज्रपञ्जरकाख्यस्य मुनिर्ब्रह्मा समीरितः ।
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥ १२ ॥
माया बीजं शरत् शक्तिर्नमः कीलकमीश्वरि ।
सर्वार्थसाधने देवि विनियोगः प्रकीर्तितः ॥ १३ ॥
ओं अं आं इं ईं शिरः पातु ओं सूर्यो मन्त्रविग्रहः ।
उं ऊं ऋं ॠं ललाटं मे ह्रां रविः पातु चिन्मयः ॥ १४ ॥
ऌं ॡं एं ऐं पातु नेत्रे ह्रीं ममारुणसारथिः ।
ओं औं अं अः श्रुती पातु सः सर्वजगदीश्वरः ॥ १५ ॥
कं खं गं घं पातु गण्डौ सूं सूरः सुरपूजितः ।
चं छं जं झं च नासां मे पातु यॉं अर्यमा प्रभुः ॥ १६ ॥
टं ठं डं ढं मुखं पायाद् यं योगीश्वरपूजितः ।
तं थं दं धं गलं पातु नं नारायणवल्लभः ॥ १७ ॥
पं फं बं भं मम स्कन्धौ पातु मं महसां निधिः ।
यं रं लं वं भुजौ पातु मूलं सकनायकः ॥ १८ ॥

शं षं सं हं पातु वक्षो मूलमन्त्रमयो ध्रुवः ।
ळं क्षः कुक्षिं सदा पातु ग्रहाथो दिनेश्वरः ॥ १९ ॥
ङं ञं णं नं मं मे पातु पृष्ठं दिवसनायकः ।
अं आं इं ईं उं ऊं ऋं ॠं नाभिं पातु तमोपहः ॥ २० ॥
ऌं ॡं एं ऐं ओं औं अं अः लिङ्गं मेऽव्याद् ग्रहेश्वरः ।
कं खं गं घं चं छं जं झं कटिं भानुर्ममावतु ॥ २१ ॥
टं ठं डं ढं तं थं दं धं जानू भास्वान् ममावतु ।
पं फं बं भं यं रं लं वं जङ्घे मेऽव्याद् विभाकरः ॥ २२ ॥
शं षं सं हं ळं क्षः पातु मूलं पादौ त्रयितनुः ।
ङं ञं णं नं मं मे पातु सविता सकलं वपुः ॥ २३ ॥
सोमः पूर्वे च मां पातु भौमोऽग्नौ मां सदावतु ।
बुधो मां दक्षिणे पातु नैऋत्या गुररेव माम् ॥ २४ ॥
पश्चिमे मां सितः पातु वायव्यां मां शनैश्चरः ।
उत्तरे मां तमः पायादैशान्यां मां शिखी तथा ॥ २५ ॥
ऊर्ध्वं मां पातु मिहिरो मामधस्ताञ्जगत्पतिः ।
प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः ॥ २६ ॥
सायं वेदप्रियः पातु निशीथे विस्फुरापतिः ।
सर्वत्र सर्वदा सूर्यः पातु मां चक्रनायकः ॥ २७ ॥
रणे राजकुले द्यूते विदादे शत्रुसङ्कटे ।
सङ्गामे च ज्वरे रोगे पातु मां सविता प्रभुः ॥ २८ ॥

ओं ओं ओं उत ओंउॐ ह स म यः सूरोऽवतान्मां भयाद् ।
ह्रां ह्रीं ह्रुं हहहा हसौः हसहसौः हंसोऽवतात् सर्वतः ।
सः सः सः ससमा नृपाद्वनचराच्चौराद्रणात् संकटात् ।
पायान्मां कुलनायकोऽपि सविता ओं ह्रीं ह सौः सर्वदा ॥ २९
द्रां द्रीं द्रूं दधनं तथा च तरणिर्भाभैर्भयाद् भास्करो
रां रीं रूं रुरुरूं रविज्ज्वरभयात् कुष्ठाच्च शूलामयात् ।
अं अं आं विविवीं महामयभयं मां पातु मार्तण्डको
मूलव्याप्ततनुः सदावतु परं हंसः सहस्त्रांशुमान् ॥ ३० ॥
इति श्रीकवच्चं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वदेवरहस्यं च मातृकामन्त्रवेष्टितम् ॥ ३१ ॥
महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् ।
गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे ॥ ३२ ॥
लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये ।
अष्टगन्धेन दिव्येन सुधाक्षीरेण पार्वति ॥ ३३ ॥
अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि ।
कनकीकाष्ठलेखन्या कवचं भास्करोदये ॥ ३४ ॥
श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद् गुटीम् ।
सौवर्णेनाथ संवेष्ठ्य धारयेन्मूर्ध्नि वा भुजे ॥ ३५ ॥
रणे रिपूञ्जयेद् देवि वादे सदसि जेष्यति ।
राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत् ॥ ३६ ॥

कण्ठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी ।
शिरःस्था गुटिका दिव्या राकलोकवशङ्करी ॥ ३७ ॥
भुजस्था धनदा नित्यं तेजोबुद्धिविवर्धिनी ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ ३८ ॥
कण्ठे सा धारयेन्नित्यं बहुपुत्रा प्रजायये ।
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरि ॥ ३९ ॥
महास्त्राणीन्द्रमुक्तानि ब्रह्मास्त्रादीनि पार्वति ।
तद्देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः ॥ ४० ॥
त्रिकालं यः पठेन्नित्यं कवचं वज्रपञ्जरम् ।
तस्य सद्यो महादेवि सविता वरदो भवेत् ॥ ४१ ॥
अज्ञात्वा कवचं देवि पूजयेद् यस्त्रयीतनुम् ।
तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलम् ॥ ४२ ॥
शतावर्तं पठेद्वर्म सप्तम्यां रविवासरे ।
महाकुष्ठार्दितो देवि मुच्यते नात्र संशयः ॥ ४३ ॥
निरोगो यः पठेद्वर्म दरिद्रो वज्रपञ्जरम् ।
लक्ष्मीवाञ्जायते देवि सद्यः सूर्यप्रसादतः ॥ ४४ ॥
भक्त्या यः प्रपठेद् देवि कवचं प्रत्यहं प्रिये ।
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ ४५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेविरहस्ये
वज्रपञ्जराख्यसूर्यकवचनिरूपणं त्रयस्त्रिंशः पटलः ॥

# ॥ श्री सूर्य सहस्रनाम स्तोत्रम् १ ॥

। अथ भविष्यपुराणान्तर्गत-सूर्यसहस्रनामस्तोत्रम् ।

ॐ विश्वजिद् विश्वजित्कर्ता विश्वात्मा विश्वतोमुखः ।
विश्वेश्वरो विश्वयोनिर्नियतात्मा जितेन्द्रियः ॥ १ ॥

कालाश्रयः कालकर्ता कालहा कालनाशनः ।
महायोगी महाबुद्धिर्महात्मा सुमहाबलः ॥ २ ॥

प्रभुर्विभुर्भूतनाथो भूतात्मा भुवनेश्वरः ।
भूतभव्यो भावितात्मा भूतान्तःकरणः शिवः ॥ ३ ॥

शरण्यः कमलानन्दो नन्दनो नन्दवर्धनः ।
वरेण्यो वरदो योगी सुसंयुक्तः प्रकाशकः ॥ ४ ॥

वाक्प्राणः परमः प्राणः प्रीतात्मा प्रियतः प्रियः ।
नयः सहस्रपात् साधुर्दिव्यकुण्डलमण्डितः ॥ ५ ॥

अव्यङ्गधारी धीरात्मा प्रचेता वायुवाहनः ।
समाहितमतिर्धाता विधाता कृतमङ्गलः ॥ ६ ॥

कपर्दी कल्पकृद्रुद्रः सुमना धर्मवत्सलः ।

समायुक्तो विमुक्तात्मा कृतात्मा कृतिनांवरः ॥ ७ ॥

अविचिन्त्यवपुः श्रेष्ठो महायोगी महेश्वरः ।

कान्तः कामादिरादित्यो नियतात्मा निराकुलः ॥ ८ ॥

कामः कारुणिकः कर्ता कमलाकरबोधनः ।

सप्तसप्तिरचिन्त्यात्मा महाकारुणिकोत्तमः ॥ ९ ॥

संजीवनो जीवनाथो जगज्जीवो जगत्पतिः ।

अजयो विश्वनिलयः संविभागो वृषध्वजः ॥ १० ॥

वृषाकपिः कल्पकर्ता कल्पान्तकरणो रविः ।

एकचक्ररथो मौनी सुरथो रथिनांवरः ॥ ११ ॥

अक्रोधनो रश्मिमाली तेजोराशिर्विभावसुः ।

दिव्यकृद् दिनकृद् देवो देवदेवो दिवस्पतिः ॥ १२ ॥

धीरानाथो हविर्होता दिव्यबाहुर्दिवाकरः ।

यज्ञो यज्ञपतिः पूषा स्वर्णरेताः परावहः ॥ १३ ॥

परापरज्ञस् तरणिरंशुमाली मनोहरः ।

प्राज्ञः प्रजापतिः सूर्यः सविता विष्णुरंशुमान् ॥ १४ ॥

सदागतिर्गन्धबाहुर्विहितो विधिराशुगः ।

पतङ्गः पतगः स्थाणुर्विहङ्गो विहगो वरः ॥ १५ ॥

हर्यश्वो हरिताश्वश्च हरिदश्वो जगत्प्रियः ।

त्र्यंबकः सर्वदमनो भावितात्मा भिषग्वरः ॥ १६ ॥

आलोककृल्लोकनाथो लोकालोकनमस्कृतः ।

कालः कल्पान्तको वह्निस्तपनः सम्प्रतापनः ॥ १७ ॥

विरोचनो विरूपाक्षः सहस्राक्षः पुरंदरः ।

सहस्ररश्मिर्मिहिरो विविधाम्बरभूषणः ॥ १८ ॥

खगः प्रतर्दनो धन्यो हयगो वाग्विशारदः ।

श्रीमांश्च शिशिरो वाग्मी श्रीपतिः श्रीनिकेतनः ॥ १९ ॥

श्रीकण्ठः श्रीधरः श्रीमान् श्रीनिवासो वसुप्रदः ।

कामचारो महामायो महेशो विदिताशयः ॥ २० ॥

तीर्थंक्रियावान् सुनयो विभवो भक्तवत्सलः ।

कीर्तिः कीर्तिकरो नित्यः कुण्डली कवची रथी ॥ २१ ॥

हिरण्यरेताः सप्ताश्वः प्रयतात्मा परंतपः ।

बुद्धिमान् अमरश्रेष्ठो रोचिष्णुः पातशासनः ॥ २२ ॥

समुद्रो धनदो धाता मान्धाता कश्मलापहः ।

तमोघ्नो ध्वान्तहा वह्निर्होतान्तःकरणो गुहः ॥ २३ ॥

पशुमान् प्रयतानन्दो भूतेशः श्रीमतांवरः ।

नित्योऽदितो नित्यरथः सुरेशः सुरपूजितः ॥ २४ ॥

अजितो विजयो जेता जङ्गमस्थावरात्मकः ।

जीवानन्दो नित्यकामी विजेता विजयप्रदः ॥ २५ ॥

पर्जन्योऽग्निः स्थितिस्थेयः स्थविरोऽणुर्निरञ्जनः ।

प्रद्योतनो रथारूढः सर्वलोकप्रकाशकः ॥ २६ ॥

ध्रुवो मेधी महावीर्यो हंसः संसारतारकः ।

सृष्टिकर्ता क्रियाहेतुर्मार्तण्डो मरुतांपतिः ॥ २७ ॥

मरुत्वान् दहनः स्पष्टा भगो भाग्योऽर्यमापतिः ।

वरुणांशो जगन्नाथः कृतकृत्यः सुलोचनः ॥ २८ ॥

विवस्वान् भानुमान् कार्यकारणं तेजसांनिधिः ।

असङ्गवामी तिग्मांशुर्धर्मांदिर्दीप्तदीधितिः ॥ २९ ॥

सहस्रदीधितिर्भघ्नः सहस्रांशुर्दिवाकरः ।

गभस्तिमान् दीधितिमान् स्रग्विमान् अतुलद्युतिः ॥ ३० ॥

भास्करः सुरकार्यज्ञः सर्वज्ञस् तीक्ष्णदीधितिः ।

सुरज्येष्ठः सुरपतिर्बहुज्ञोवचसांपतिः ॥ ३१ ॥

तेजोनिधिर्बृहत्तेजा बृहत्कीर्तिर्बृहस्पतिः ।

अहिमानूर्जितो धीमान् आमुक्तः कीर्तिवर्धनः ॥ ३२ ॥

महावैद्याग्रेणपतिर्गणेशो गणनायकः ।

तीव्रप्रतापनस् तापी तापनो विश्वतापनः ॥ ३३ ॥

कार्तस्वरो हृषीकेशः पद्मानन्दोऽभिनन्दितः ।

पद्मनाभोऽमृताहारः स्थितिमान् केतुमान् नभः ॥ ३४ ॥

अनाद्यन्तोऽच्युतो विश्वो विश्वामित्रो घृणी विराट् ।

आमुक्तः कवची वाग्मी कञ्चुकी विश्वभावनः ॥ ३५ ॥

अनिमित्तगतिः श्रेष्ठः शरण्यः सर्वतोमुखः ।

विगाहीरेणुरसहः समायुक्तः समाहितः ॥ ३६ ॥

धर्मकेतुर्धर्मरतिः संहर्ता संयमोयमः ।

प्रणतार्तिहरो वादी सिद्धकार्यो जनेश्वरः ॥ ३७ ॥

नभो विगाहनः सत्यः स्थामसः सुमनो हरः ।

हारी हरिर्हरो वायुर्ऋतुः कालानलद्युतिः ॥ ३८ ॥

सुखसेव्यो महातेजा जगतामन्तकारणम् ।

महेन्द्रो विष्टुतः स्तोत्रं स्तुतिहेतुः प्रभाकरः ॥ ३९ ॥

सहस्त्रकल आयुष्मान् अरोषः सुखदः सुखी ।

व्याधिहा सुखदः सौख्यं कल्याणः कल्पिनांवरः ॥ ४० ॥

आरोग्यकर्मणां सिद्धिर्वृद्धिर्ऋद्धिरहस्पतिः ।

हिरण्यरेता आरोग्यं विद्वान् बन्धुर्बुधो महान् ॥ ४१ ॥

प्रणवान् धृतिमान् धर्मो धर्मकर्ता रुचिप्रदः ।

सर्वप्रियः सर्वसहः सर्वशत्रुनिवारुणः ॥ ४२ ॥

प्रांशुर्विद्योतनो द्योतः सहस्रकिरणः कृतिः ।

केयूरभूषणोद्भासी भासितो भासनोऽनलः ॥ ४३ ॥

शरण्यार्तिहरो होता खद्योतः खगसत्तमः ।

सर्वद्योतोऽमवद्द्योतः सर्वद्युतिकरोऽमलः ॥ ४४ ॥

कल्याणः कल्याणकरः कल्पः कल्पकरः कविः ।

कल्याणकृत् कल्पवपुः सर्वकल्याणभाजनः ॥ ४५ ॥

शान्तिप्रियः प्रसन्नात्मा प्रशान्तः प्रशमप्रियः ।

उदारकर्मा सुनयः सुवर्चा वर्चसोज्ज्वलः ॥ ४६ ॥

वर्चस्वी वर्चसामीशस् त्रैलोक्येशो वशानुगः ।

तेजस्वी सुयशावर्णिर्वर्णाध्यक्षो बलिप्रियः ॥ ४७ ॥

यशस्वी वेदनिलयस् तेजस्वी प्रकृतिस्थितः ।

आकाशगः शीघ्रगतिराशुगः श्रुतिमान् खगः ॥ ४८ ॥

गोपतिर्ग्रहदेवेशो गोमान् एकः प्रभञ्जनः ।

जनिताप्रजगण्डीवो दीपः सर्वप्रकाशकः ॥ ४९ ॥

कर्मसाक्षी योगनित्यो नभस्वान् असुरान्तकः ।

रक्षोघ्नो विघ्नशमनः किरीटी सुमनःप्रियः ॥ ५० ॥

मरीचिमाली सुमतिः कृतातिथ्योऽविशेषतः ।

शिष्टाचारः शुभाकारः स्वाचारा चारतत्परः ॥ ५१ ॥

मन्दारो माठरो रेणुः क्षोभणः पक्षिणाङ्गुरुः ।

स्वविशिष्टो विशिष्टात्मा विधेयो ज्ञानशोभनः ॥ ५२ ॥

महाश्वेता प्रियो ज्ञेयः सामगो मोददायकः ।

सर्ववेदप्रगीतात्मा सर्ववेदो गयालयः ॥ ५३ ॥

वेदमूर्तिश्चतुर्वेदो वेदभृद् वेदपारगः ।

क्रियावान् अतिरोचिष्णुर्वरीयांश्च वरप्रदः ॥ ५४ ॥

व्रतधारी व्रतधरो लोकबन्धुरलंकृतः ।

अलंकाराक्षरो दिव्यविद्यावान् विदितारायः ॥ ५५ ॥

अकारो भूषणो भूष्यो भूष्णुर्भवनपूजितः ।

चक्रपाणिर्वज्रधरः सुवेशो लोकवत्सलः ॥ ५६ ॥

राज्ञीपतिर्महाबाहुः प्रकृतिर्विकृतिर्गुणः ।

अन्धकारापहः श्रेष्ठो युगावर्तो युगादिकृत् ॥ ५७ ॥

अप्रमेयः सदायोगी निरहंकार ईश्वरः ।

शुभप्रदः शुभशोभा शुभकर्मा शुभास्पदः ॥ ५८ ॥

सत्यवान् धृतिमान् अच्यौं ह्यकारो वृद्धिदोऽनलः ।

बलभृद् बलगो बन्धुर्बलवान् हरिणांवरः ॥ ५९ ॥

अनङ्गोऽनागराणिन्द्रः पद्मयोनिर्गणेश्वरः ।

संवत्सर ऋतुर्नेता कालचक्रप्रवर्तकः ॥ ६० ॥

पद्मेक्षरः पद्मयोनिः प्रभवोऽनसरद्युतिः ।

सुमूर्तिः सुमतिः सोमो गोविन्दो जगदादिजः ॥ ६१ ॥

पीतवासाः कृष्णवासा दिग्वासातीन्द्रियो हरिः ।

अतीन्द्रोऽनेकरूपात्मा स्कन्दः परपुरंजयः ॥ ६२ ॥

शक्तिमान् सूरधृग् भास्वान् मोक्षहेतुरयोनिजः ।
सर्वदर्शोऽदितो दर्शो दुःस्वप्नाशुभनाशनः ॥ ६३ ॥
माङ्गल्यकर्ता करणिर्वेगवान् कश्मलापहः ।
स्पष्टाक्षरो महामन्त्रो विशाखो यजनप्रियः ॥ ६४ ॥
विश्वकर्मा महाशक्तिर्ज्योतिरीशविहंगमः ।
विचक्षणो दक्ष इन्द्रः प्रत्यूहः प्रियदर्शनः ॥ ६५ ॥
अश्विनौ वेदनिलयो वेदविद् विदिताशयः ।
प्रभाकरो जितरिपुः सुजनोऽरुणसारथिः ॥ ६६ ॥
कुबेरसुरथः स्कन्दो महितोऽभिहितो गुहः ।
ग्रहराजो ग्रहपतिर्ग्रहनक्षत्रमण्डनः ॥ ६७ ॥
भास्करः सततानन्दो नन्दनो नन्दिवर्धनः ।
मङ्गलोऽप्यथ मङ्गलवान् माङ्गल्योऽमङ्गलापहः ॥ ६८ ॥
मङ्गलाचारचरितः शीर्णः सर्वव्रतो व्रती ।
चतुर्मुखः पद्ममाली पूतात्मा प्रणतार्तिहा ॥ ६९ ॥

अकिञ्चनः सत्यसन्धो निर्गुणो गुणवान् गुणी ।
सम्पूर्णः पुण्डरीकाक्षो विधेयो योगतत्परः ॥ ७० ॥

सहस्रांशुः क्रतुपतिः सर्वस्वं सुमतिः सुवाक् ।
सुभामनो माल्यदामा घृताहारो हरिप्रियः ॥ ७१ ॥

ब्रह्मप्रचेता प्रथितः प्रतीतात्मा स्थिरात्मकः ।
शतबिन्दुः शतमखो गरीयान् अनलप्रभुः ॥ ७२ ॥

धीरो महत्तरो धन्यः पुरुषः पुरुषोत्तमः ।
विद्याधराधिराजोऽहिविद्यावान् भूतिदस्थितः ॥७३ ॥

अनिर्देश्यवपुः श्रीमान् विश्वात्मा बहुमङ्गलः ।
सुस्थितः सुरथः स्वर्णो मोक्षाधारनिकेतनः ॥ ७४ ॥

निर्द्वन्द्वो द्वन्द्वहा सर्गः सर्वगः सम्प्रकाशयः ।
दयालुः सूक्ष्मरीः शान्तिः क्षेमाक्षेमस्थितिप्रियः ॥ ७५ ॥

भूतरो भूपतिर्वक्ता पवित्रात्मा त्रिलोचनः ।
महावराहः प्रियकृद् धाता भोक्ताभयप्रदः ॥ ७६ ॥

चतुर्वेदधरो नित्यो विनिद्रो विविधाशनः ।

चक्रवर्ती धृतिकरः सम्पूर्णोऽथ महेश्वरः ॥ ७७ ॥

विचित्ररथ एकाकी सप्तसप्तिः परात्परः ।

सर्वोदधिस्थितिकरः स्थितिस्थेयः स्थितिप्रियः ॥ ७८ ॥

निष्कलः पुष्करनिभो वसुमान् वासवप्रियः ।

वसुमान् वासवस्वामी वसुराता वसुप्रदः ॥ ७९ ॥

बलवान् ज्ञानवांस्तत्त्वम् ओंकारस् तृषुसंस्थितः ।

संकल्पयोनिर्दिनकृद् भगवान् कारणावहः ॥ ८० ॥

नीलकण्ठो धनाध्यक्षश्चतुर्वेदप्रियंवदः ।

वषट्कारो हुतं होता स्वाहाकारो हुताहुतिः ॥ ८१ ॥

जनार्दनो जनानन्दो नरो नारायणोऽम्बुदः ।

स्वर्णाङ्गक्षपणो वायुः सुरा सुरनमस्कृतः ॥ ८२ ॥

विग्रहो विमलो बिन्दुर्विशोको विमलद्युतिः ।

द्योतितो द्योतनो विद्वान् विविद्वान् वरदो बली ॥ ८३ ॥

धर्मयोनिर्महामोहो विष्णुभ्राता सनातनः ।

सावित्रीभावितो राजा विसृतो विघृणी विराट् ॥ ८४ ॥

सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः ।

सम्पन्नोऽथ जगन्नाथः सुमनाः शोभनप्रियः ॥ ८५ ॥

सर्वात्मा सर्वकृत् सृष्टिः सप्तिमान् सप्तमीप्रियः ।

सुमेधा माधवो मेध्यो मेधावी मधुसूदनः ॥ ८६ ॥

अङ्गिरा गतिकालज्ञो धूमकेतुसुकेतनः ।

सुखी सुखप्रदः सौख्यं कामी कान्तिप्रियो मुनिः ॥ ८७ ॥

संतापनः संतपन आतपी तपसांपतिः ।

उग्रश्रवा सहस्रोस्रः प्रियङ्कारो प्रियङ्करः ॥ ८८ ॥

प्रीतो विमन्युरम्भोदो जीवनो जगतांपतिः ।

जगत्पिता प्रीतमनाः सर्वः शर्वो गुहावलः ॥ ८९ ॥

सर्वगो जगदानन्दो जगन्नेता सुरारिहा ।

श्रेयः श्रेयस्करो ज्यायानुत्तमोत्तम उत्तमः ॥ ९० ॥

उत्तमोऽथ महामेरुर्धारणो धरणीधरः ।

धाराधरो धर्मराजो धर्माधर्मप्रवर्तकः ॥ ९१ ॥

रथाध्यक्षो रथपतिस् त्वरमाणोऽमितानलः ।

उत्तरोऽनुत्तरस् तापी तारापतिरपांपतिः ॥ ९२ ॥

पुण्यसंकीर्तनः पुण्यो हेतुर्लोकत्रयाश्रयः ।

स्वर्भानुर्विहगारिष्टो विशिष्टोत्कृष्टकर्मकृत् ॥ ९३ ॥

व्याधिप्रणाशनः क्षेमः शूरः सर्वजिताम्बरः ।

एकनाथो रथाधीशः शनैश्चरपितासितः ॥ ९४ ॥

वैवस्वतगुरुर्मृत्युर्धर्मनित्यो महाव्रतः ।

प्रलम्बहारः संचारी प्रद्योतो द्योतितोऽनलः ॥ ९५ ॥

संतानकृत् परो मन्त्रो मन्त्रमूर्तिर्महाबलः ।

श्रेष्ठात्मा सुप्रियः शम्भुर्महतामीश्वरेश्वरः ॥ ९६ ॥

संसारगतिविच्छेता संसारार्णवतारकः ।

सप्तजिह्वः सहस्राचीर्ं रत्नगर्भोऽपराजितः ॥ ९७ ॥

धर्मकेतुरमेयात्मा धर्माधर्मवरप्रदः ।

लोकसाक्षी लोकगुरुर्लोकेशश् छन्दवाहनः ॥ ९८ ॥

धर्मरूपः सूक्ष्मवायुर्धनुष्पाणिर्धनुर्धरः ।

पिनाकधृन् महोत्साहो नैकमायो महाशनः ॥ ९९ ॥

वारः शक्तिमतांश्रेष्ठः सर्वशस्त्रभृतांवरः ।

ज्ञानगम्यो दुराराध्यो लोहिताङ्गोऽरिमर्दनः ॥ १०० ॥

अनन्तो धर्मदो नित्यो धर्मकृच्चित् त्रिविक्रमः ।

दैवत्रस् त्र्यक्षरो मध्यो नीलाङ्गो नीललोहितः ॥ १०१ ॥

एकोऽनेकस् त्रयीव्यासः सविता समितिञ्जयः ।

शार्ङ्गधन्वानलो भीमः सर्वप्रहरणायुधः ॥ १०२ ॥

परमेष्ठी परंज्योतिर्नाकपाली दिवस्पतिः ।

वदान्यो वासुकिर्वैद्य आत्रेयोऽतिपराक्रमः ॥ १०३ ॥

द्वापरः परमोदारः परमब्रह्मचर्यवान् ।

उद्दीप्तवेषो मुकुटी पद्महस्तोऽहिमांशुभृत् ॥ १०४ ॥

स्मितः प्रसन्नवदनः पद्मोदरनिभाननः ।

सायंदिवा दिव्यवपुरनिर्देश्यो महारथः ॥ १०५ ॥

महारथो महानीशः शेषः सत्त्वरजस्तमः ।

धृतातपत्रः प्रतिमो विमर्शी निर्णयस्थितः ॥ १०६ ॥

अहिंसकः शुद्धमतिरद्वितीयो विमर्दनः ।

सर्वदो धनदो मोक्षो विहारी बहुदायकः ॥ १०७ ॥

ग्रहनाथो ग्रहपतिर्ग्रहेशस् तिमिरापहः ।

मनो हरवपुः शुभ्रः शोभनः सुप्रभाननः ॥ १०८ ॥

सुप्रभः सुप्रभाकारः सुनेत्रो निक्षुभापतिः ।

राज्ञीप्रियः शब्दकरो ग्रहेशस् तिमिरापहः ॥ १०९ ॥

सैंहिकेयरिपुर्देवो वरदो वरनायकः ।

चतुर्भुजो महायोगी योगीश्वरपतिस् तथा ॥ ११० ॥

अनादिरूपोऽदितिजो रत्नकान्तिः प्रभामयः ।

जगत्प्रदीपो विस्तीर्णो महाविस्तीर्णमण्डलः ॥ १११ ॥

एकचक्ररथः स्वर्णरथः स्वर्णशरीरधृक् ।

निरालम्बो गगनरो धर्मकर्मप्रभावकृत् ॥ ११२ ॥

धर्मात्मा कर्मणांसाक्षी प्रत्यक्षः परमेश्वरः ।

मेरुसेवी सुमेधावी मेरुरक्षाकरो महान् ॥ ११३ ॥

आधारभूको रतिमांस्तथा च धनधान्यकृत् ।

पापसंतापसंहर्ता मनोवांछितदायकः ॥ ११४ ॥

लोकहर्ता राज्यदायी रमणीयगुणोऽनृणी ।

कालत्रयानन्तरूपो मुनिवृन्दनमस्कृतः ॥ ११५ ॥

संध्यारागकरः सिद्धः संध्यावन्दनवन्दितः ।

साम्राज्यदाननिरतः समाराधनतोषवान् ॥ ११६ ॥

भक्तदुःखक्षयकरो भवसागरतारकः ।

भयापहर्ता भगवान् अप्रमेयपराक्रमः ॥ ११७ ॥

मनुस्वामी मनुपतिर्मान्यो मन्वन्तराधिपः ॥ ११८ ॥

॥ इति श्री भविष्ये महापुराणे सूर्यसहस्रनाम स्तोत्रं सम्पूर्णम् ॥

# ॥ सूर्यकवचस्तोत्रम् ॥

श्रीगणेशाय नमः ।

याज्ञवल्क्य उवाच ।

श्रृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १ ॥

देदीप्यमानमुकुटं स्फुरन्मकरकुण्डलम् ।
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २ ॥

शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥ ३ ॥

घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥ ४ ॥

स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥ ५ ॥

सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ ६ ॥

सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विन्दति ॥ ७ ॥

॥ इति श्रीमद्याज्ञवल्क्यमुनिविरचितं सूर्यकवचस्तोत्रं सम्पूर्णम् ॥

# ॥ श्री चन्द्र अष्टोत्तरशतनामावलिः ॥

## चन्द्र बीज मन्त्र -

## ॐ श्राँ श्रीं श्रौं सः चन्द्राय नमः ॥

ॐ श्रीमते नमः ॥
ॐ शशधराय नमः ॥
ॐ चन्द्राय नमः ॥
ॐ ताराधीशाय नमः ॥
ॐ निशाकराय नमः ॥
ॐ सुखनिधये नमः ॥
ॐ सदाराध्याय नमः ॥
ॐ सत्पतये नमः ॥
ॐ साधुपूजिताय नमः ॥
ॐ जितेन्द्रियाय नमः ॥
ॐ जयोद्योगाय नमः ॥
ॐ ज्योतिश्चक्रप्रवर्तकाय नमः ॥
ॐ विकर्तनानुजाय नमः ॥

ॐ वीराय नमः ॥
ॐ विश्वेशाय नमः ॥
ॐ विदुशां पतये नमः ॥
ॐ दोषकराय नमः ॥
ॐ दुष्टदूराय नमः ॥
ॐ पुष्टिमते नमः ॥
ॐ शिष्टपालकाय नमः ॥
ॐ अष्टमूर्तिप्रियाय नमः ॥
ॐ अनन्ताय नमः ॥
ॐ कष्टदारुकुठरकाय नमः ॥
ॐ स्वप्रकाशाय नमः ॥
ॐ प्रकाशात्मने नमः ॥
ॐ द्युचराय नमः ॥

ॐ देवभोजनाय नमः ॥

ॐ कलाधराय नमः ॥

ॐ कालहेतवे नमः ॥

ॐ कामकृते नमः ॥

ॐ कामदायकाय नमः ॥

ॐ मृत्युसंहारकाय नमः ॥

ॐ अमर्त्याय नमः ॥

ॐ नित्यानुष्ठानदायकाय नमः ॥

ॐ क्षपाकराय नमः ॥

ॐ क्षीणपापाय नमः ॥

ॐ क्षयवृद्धिसमन्विताय नमः ॥

ॐ जैवातृकाय नमः ॥

ॐ शुचये नमः ॥

ॐ शुभ्राय नमः ॥

ॐ जयिने नमः ॥

ॐ जयफलप्रदाय नमः ॥

ॐ सुधामयाय नमः ॥

ॐ सुरस्वामिने नमः ॥

ॐ भक्तनामिष्टदायकाय नमः ॥

ॐ भुक्तिदाय नमः ॥

ॐ मुक्तिदाय नमः ॥

ॐ भद्राय नमः ॥

ॐ भक्तदारिद्र्यभञ्जनाय नमः ॥

ॐ सामगानप्रियाय नमः ॥

ॐ सर्वरक्षकाय नमः ॥

ॐ सागरोद्भवाय नमः ॥

ॐ भयान्तकृते नमः ॥

ॐ भक्तिगम्याय नमः ॥

ॐ भवबन्धविमोचकाय नमः ॥

ॐ जगत्प्रकाशकिरणाय नमः ॥

ॐ जगदानन्दकारणाय नमः ॥

ॐ निस्सपत्नाय नमः ॥

ॐ निराहाराय नमः ॥

ॐ निर्विकाराय नमः ॥

ॐ निरामयाय नमः ॥

ॐ भूच्छयाच्छादिताय नमः ॥

ॐ भव्याय नमः ॥

ॐ भुवनप्रतिपालकाय नमः ॥

ॐ सकलार्तिहराय नमः ॥

ॐ सौम्यजनकाय नमः ॥

ॐ साधुवन्दिताय नमः ॥

ॐ सर्वागमज्ञाय नमः ॥

ॐ सर्वज्ञाय नमः ॥

ॐ सनकादिमुनिस्तुताय नमः ॥

ॐ सितच्छत्रध्वजोपेताय नमः ॥

ॐ सिताङ्गाय नमः ॥

ॐ सितभूषनाय नमः ॥

ॐ श्वेतमाल्याम्बरधराय नमः ॥

ॐ श्वेतगन्धानुलेपनाय नमः ॥

ॐ दशाश्वरथसंरूढाय नमः ॥

ॐ दण्डपानये नमः ॥

ॐ धनुर्धराय नमः ॥

ॐ कुन्दपुष्पोज्ज्वलाकाराय नमः ॥

ॐ नयनाब्जसमुद्भवाय नमः ॥

ॐ आत्रेयगोत्रजाय नमः ॥

ॐ अत्यन्तविनयाय नमः ॥

ॐ प्रियदायकाय नमः ॥

ॐ करुणारससंपूर्णाय नमः ॥

ॐ कर्कटप्रभवे नमः ॥

ॐ अव्ययाय नमः ॥

ॐ चतुरश्रासनारूढाय नमः ॥

ॐ चतुराय नमः ॥

ॐ दिव्यवाहनाय नमः ॥

ॐ ववस्वन्मण्डलज्ञेयवसाय नमः ॥

ॐ वसुसमृद्धिदाय नमः ॥

ॐ महेश्वरप्रियाय नमः ॥

ॐ दान्ताय नमः ॥

ॐ मेरुगोत्रप्रदक्षिणाय नमः ॥

ॐ ग्रहमण्डलमध्यस्थाय नमः ॥

ॐ ग्रसितार्काय नमः ॥

ॐ ग्रहाधिपाय नमः ॥

ॐ द्विजराजाय नमः ॥

ॐ द्युतिकलाय नमः ॥

ॐ द्विभुजाय नमः ॥

ॐ द्विजपूजिताय नमः ॥

ॐ औदुम्बरनगावासाय नमः ॥

ॐ उदाराय नमः ॥

ॐ रोहिणीपतये नमः ॥

ॐ नित्योदयाय नमः ॥

ॐ मुनिस्तुत्याय नमः ॥

ॐ नित्यानन्दफलप्रदाय नमः ॥

ॐ सकलाह्लादनकराय नमः ॥

ॐ पलाशेध्मप्रियाय नमः ॥

॥ इति चन्द्र अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of the Moon (Monday)

CHARITY: Donate water, cow's milk or white rice to a female leader on Monday evening.

FASTING: On Mondays, especially during Moon transits and major or minor Moon periods.

MANTRA: To be chanted on Monday evening, especially during major or minor Moon periods:

RESULT: The planetary diety Chandra is propitiated increasing mental health and peace of mind.

# ॥ चन्द्रकवचम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीचन्द्रकवचस्तोत्रमन्त्रस्य गौतम् ऋषिः ।

अनुष्टुप् छन्दः, श्रीचन्द्रो देवता, चन्द्रप्रीत्यर्थं जपे विनियोगः ।

समं चतुर्भुजं वन्दे केयूरमुकुटोज्ज्वलम् ।
वासुदेवस्य नयनं शङ्करस्य च भूषणम् ॥ १ ॥
एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम् ।
शशी पातु शिरोदेशं भालं पातु कलानिधिः ॥ २ ॥
चक्षुषी चन्द्रमाः पातु श्रुती पातु निशापतिः ।
प्राणं क्षपाकरः पातु मुखं कुमुदबान्धवः ॥ ३ ॥
पातु कण्ठं च मे सोमः स्कन्धे जैवातृकस्तथा ।
करौ सुधाकरः पातु वक्षः पातु निशाकरः ॥ ४ ॥
हृदयं पातु मे चन्द्रो नाभिं शङ्करभूषणः ।
मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः ॥ ५ ॥
ऊरू तारापतिः पातु मृगाङ्को जानुनी सदा ।
अब्धिजः पातु मे जङ्घे पातु पादौ विधुः सदा ॥ ६ ॥
सर्वाण्यन्यानि चाङ्गानि पातु चन्द्रोऽखिलं वपुः ।
एतद्धि कवचं दिव्यं भुक्तिमुक्तिप्रदायकम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ७ ॥

॥ इति श्रीचन्द्रकवचं सम्पूर्णम् ॥

# ॥ श्री अङ्गारकाष्टोत्तर शतनामावलि ॥

## मङ्गल बीज मन्त्र -

## ॐ क्राँ क्रीं क्रौं सः भौमाय नमः ॥

ॐ महीसुताय नमः ॥

ॐ महाभागाय नमः ॥

ॐ मङ्गलाय नमः ॥

ॐ मङ्गलप्रदाय नमः ॥

ॐ महावीराय नमः ॥

ॐ महाशूराय नमः ॥

ॐ महाबलपराक्रमाय नमः ॥

ॐ महारौद्राय नमः ॥

ॐ महाभद्राय नमः ॥

ॐ माननीयाय नमः ॥

ॐ दयाकराय नमः ॥

ॐ मानदाय नमः ॥

ॐ अपर्वणाय नमः ॥

ॐ क्रूराय नमः ॥

ॐ तापत्रयविवर्जिताय नमः ॥

ॐ सुप्रतीपाय नमः ॥

ॐ सुताम्राक्षाय नमः ॥

ॐ सुब्रह्मण्याय नमः ॥

ॐ सुखप्रदाय नमः ॥

ॐ वक्रस्तम्भादिगमनाय नमः ॥

ॐ वरेण्याय नमः ॥

ॐ वरदाय नमः ॥

ॐ सुखिने नमः ॥

ॐ वीरभद्राय नमः ॥

ॐ विरूपाक्षाय नमः ॥

ॐ विदूरस्थाय नमः ॥

ॐ विभावसवे नमः ॥
ॐ नक्षत्रचक्रसञ्चारिणे नमः ॥
ॐ क्षत्रपाय नमः ॥
ॐ क्षात्रवर्जिताय नमः ॥
ॐ क्षयवृद्धिविनिर्मुक्ताय नमः ॥
ॐ क्षमायुक्ताय नमः ॥
ॐ विचक्षणाय नमः ॥
ॐ अक्षीणफलदाय नमः ॥
ॐ चतुर्वर्गफलप्रदाय नमः ॥
ॐ वीतरागाय नमः ॥
ॐ वीतभयाय नमः ॥
ॐ विज्वराय नमः ॥
ॐ विश्वकारणाय नमः ॥
ॐ नक्षत्रराशिसंचाराय नमः ॥
ॐ नानाभयनिकृन्तनाय नमः ॥
ॐ वन्दारुजनमन्दाराय नमः ॥
ॐ वक्रकुञ्चितमूर्धजाय नमः ॥
ॐ कमनीयाय नमः ॥
ॐ दयासाराय नमः ॥
ॐ कनत्कनकभूषणाय नमः ॥
ॐ भयघ्नाय नमः ॥
ॐ भव्यफलदाय नमः ॥
ॐ भक्ताभयवरप्रदाय नमः ॥
ॐ शत्रुहन्त्रे नमः ॥
ॐ शमोपेताय नमः ॥
ॐ शरणागतपोषनाय नमः ॥
ॐ साहसिने नमः ॥
ॐ सद्गुणाध्यक्षाय नमः ॥
ॐ साधवे नमः ॥
ॐ समरदुर्जयाय नमः ॥
ॐ दुष्टदूराय नमः ॥
ॐ शिष्टपूज्याय नमः ॥

ॐ सर्वकष्टनिवारकाय नमः ॥
ॐ दुश्चेष्टवारकाय नमः ॥
ॐ दुःखभञ्जनाय नमः ॥
ॐ दुर्धराय नमः ॥
ॐ हरये नमः ॥
ॐ दुःस्वप्नहन्त्रे नमः ॥
ॐ दुर्धर्षाय नमः ॥
ॐ दुष्टगर्वविमोचनाय नमः ॥
ॐ भरद्वाजकुलोद्भूताय नमः ॥
ॐ भूसुताय नमः ॥
ॐ भव्यभूषणाय नमः ॥
ॐ रक्ताम्बराय नमः ॥
ॐ रक्तवपुषे नमः ॥
ॐ भक्तपालनतत्पराय नमः ॥
ॐ चतुर्भुजाय नमः ॥
ॐ गदाधारिणे नमः ॥
ॐ मेषवाहाय नमः ॥
ॐ मिताशनाय नमः ॥

ॐ शक्तिशूलधराय नमः ॥
ॐ शाक्ताय नमः ॥
ॐ शस्त्रविद्याविशारदाय नमः ॥
ॐ तार्किकाय नमः ॥
ॐ तामसाधाराय नमः ॥
ॐ तपस्विने नमः ॥
ॐ ताम्रलोचनाय नमः ॥
ॐ तप्तकाञ्चनसंकाशाय नमः ॥
ॐ रक्तकिञ्जल्कसंनिभाय नमः ॥
ॐ गोत्राधिदेवाय नमः ॥
ॐ गोमध्यचराय नमः ॥
ॐ गुणविभूषणाय नमः ॥
ॐ असृजे नमः ॥
ॐ अङ्गारकाय नमः ॥
ॐ अवन्तीदेशाधीशाय नमः ॥
ॐ जनार्दनाय नमः ॥
ॐ सूर्ययाम्यप्रदेशस्थाय नमः ॥
ॐ घुने नमः ॥

| | |
|---|---|
| ॐ यौवनाय नमः ॥ | ॐ शुचिवश्याय नमः ॥ |
| ॐ याम्यहरिन्मुखाय नमः ॥ | ॐ शुभावहाय नमः ॥ |
| ॐ याम्यदिङ्मुखाय नमः ॥ | ॐ मेषवृश्चिकराशीशाय नमः ॥ |
| ॐ त्रिकोणमण्डलगताय नमः ॥ | ॐ मेधाविने नमः ॥ |
| ॐ त्रिदशाधिपसन्नुताय नमः ॥ | ॐ मितभाषणाय नमः ॥ |
| ॐ शुचये नमः ॥ | ॐ सुखप्रदाय नमः ॥ |
| ॐ शुचिकराय नमः ॥ | ॐ सुरूपाक्षाय नमः ॥ |
| ॐ शूराय नमः ॥ | ॐ सर्वाभीष्टफलप्रदाय नमः ॥ |

॥ इति अङ्गारक अष्टोत्तर शतनामावलिस्समाप्ता ॥

Propitiation of Mars (Tuesday)

CHARITY: Donate wheat bread, sweets made from sugar mixed with white sesamum seeds, or masoor dal (red lentils) to a celibate on Tuesday at noon.

FASTING: On Tuesdays, especially during Mars transits and major or minor Mars periods.

MANTRA: To be chanted on Tuesday, one hour after sunrise, especially during major or minor Mars periods:

RESULT: The planetary diety Mangala is propitiated increasing determination and drive, and protecting one from violence.

# ॥ अङ्गारकस्तोत्रम् ॥

अस्य श्री अङ्गारकस्तोत्रस्य ।
विरूपाङ्गिरस ऋषिः । अग्निर्देवता । गायत्री छन्दः ।
भौमप्रीत्यर्थं जपे विनियोगः ।

अङ्गारकः शक्तिधरो लोहिताङ्गो धरासुतः ।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः ॥ १ ॥
ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः ।
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः ॥ २ ॥
सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः ।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥ ३ ॥
रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः ।
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥ ४ ॥
ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति ।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ॥ ५ ॥
वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः ।
योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः ॥ ६ ॥
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥ ७ ॥

॥ इति श्रीस्कन्दपुराणे अङ्गारकस्तोत्रं संपूर्णम् ॥

# ॥ मङ्गलकवचम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीअङ्गारककवचस्तोत्रमन्त्रस्य कश्यप ऋषिः,
अनुष्टुप् छन्दः, अङ्गारको देवता, भौमप्रीत्यर्थं जपे विनियोगः ।

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥ १

अङ्गारकः शिरो रक्षेन्मुखं वै धरणीसुतः ।
श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः ॥ २ ॥

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥ ३ ॥

वक्षः पातु वराङ्गश्च हृदयं पातु रोहितः ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥ ४ ॥

जानुजङ्घे कुजः पातु पादौ भक्तप्रियः सदा ।
सर्वाण्यन्यानि चाङ्गानि रक्षेन्मे मेषवाहनः ॥ ५ ॥

य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् ।
भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् ॥ ६ ॥

सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम् ।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ।
रोगबन्धविमोक्षं च सत्यमेतन्न संशयः ॥ ७ ॥

॥ इति श्रीमार्कण्डेयपुराणे मङ्गलकवचं सम्पूर्णम् ॥

# ॥ ऋणमोचक मङ्गलस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥ १ ॥

लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ २ ॥

अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३ ॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ ४ ॥

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ५ ॥

स्तोत्रमङ्गारकस्यैतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥ ६ ॥

अङ्गारक महाभाग भगवन्भक्तवत्सल ।

त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७ ॥

ऋणरोगादिदारिद्र्यं ये चान्ये ह्यपमृत्यवः ।

भयक्लेशमनस्तापा नश्यन्तु मम सर्वदा ॥ ८ ॥

अतिवक्र दुराराध्य भोगमुक्त जितात्मनः ।

तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ९ ॥

विरिंचिशक्रविष्णूनां मनुष्याणां तु का कथा ।

तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ १० ॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः ।

ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥ ११ ॥

एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।

महतिं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ १२ ॥

# ॥ बुधपञ्चविंशतिनामस्तोत्रम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीबुधपञ्चविंशतिनामस्तोत्रस्य प्रजापतिर्ऋषिः,
त्रिष्टुप् छन्दः, बुधो देवता, बुधप्रीत्यर्थं जपे विनियोगः ॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ।
प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥ १ ॥

ग्रहपमो रौहिणेयो नक्षत्रेशो दयाकरः ।
विरुद्धकार्यहन्ता च सौम्यौ बुद्धिविवर्धनः ॥ २ ॥

चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः ।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥ ३ ॥

लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः ।
पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥ ४ ॥

स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति ।
तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥ ५ ॥

इति श्रीपद्मपुराणे बुधपञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥

# ॥ श्री बुध अष्टोत्तरशतनामावलिः ॥

## बुध बीज मन्त्र -

## ॐ ब्राँ ब्रीं ब्रौं सः बुधाय नमः ॥

ॐ बुधाय नमः ॥
ॐ बुधार्चिताय नमः ॥
ॐ सौम्याय नमः ॥
ॐ सौम्यचित्ताय नमः ॥
ॐ शुभप्रदाय नमः ॥
ॐ दृढव्रताय नमः ॥
ॐ दृढफलाय नमः ॥
ॐ श्रुतिजालप्रबोधकाय नमः ॥
ॐ सत्यवासाय नमः ॥
ॐ सत्यवचसे नमः ॥ १०
ॐ श्रेयसां पतये नमः ॥
ॐ अव्ययाय नमः ॥
ॐ सोमजाय नमः ॥

ॐ सुखदाय नमः ॥
ॐ श्रीमते नमः ॥
ॐ सोमवंशप्रदीपकाय नमः ॥
ॐ वेदविदे नमः ॥
ॐ वेदतत्त्वाशाय नमः ॥
ॐ वेदान्तज्ञानभास्कराय नमः ॥
ॐ विद्याविचक्षणाय नमः ॥ २०
ॐ विदुषे नमः ॥
ॐ विद्वत्प्रीतिकराय नमः ॥
ॐ ऋजवे नमः ॥
ॐ विश्वानुकूलसंचाराय नमः ॥
ॐ विशेषविनयान्विताय नमः ॥
ॐ विविधागमसारज्ञाय नमः ॥

ॐ वीर्यवते नमः ॥

ॐ विगतज्वराय नमः ॥

ॐ त्रिवर्गफलदाय नमः ॥

ॐ अनन्ताय नमः ॥ ३०

ॐ त्रिदशाधिपपूजिताय नमः ॥

ॐ बुद्धिमते नमः ॥

ॐ बहुशास्त्रज्ञाय नमः ॥

ॐ बलिने नमः ॥

ॐ बन्धविमोचकाय नमः ॥

ॐ वक्रातिवक्रगमनाय नमः ॥

ॐ वासवाय नमः ॥

ॐ वसुधाधिपाय नमः ॥

ॐ प्रसन्नवदनाय नमः ॥

ॐ वन्द्याय नमः ॥ ४०

ॐ वरेण्याय नमः ॥

ॐ वाग्विलक्षणाय नमः ॥

ॐ सत्यवते नमः ॥

ॐ सत्यसंकल्पाय नमः ॥

ॐ सत्यबन्धवे नमः ॥

ॐ सदादराय नमः ॥

ॐ सर्वरोगप्रशमनाय नमः ॥

ॐ सर्वमृत्युनिवारकाय नमः ॥

ॐ वाणिज्यनिपुणाय नमः ॥

ॐ वश्याय नमः ॥ ५०

ॐ वाताङ्गाय नमः ॥

ॐ वातरोगहृते नमः ॥

ॐ स्थूलाय नमः ॥

ॐ स्थैर्यगुणाध्यक्षाय नमः ॥

ॐ स्थूलसूक्ष्मादिकारणाय नमः ॥

ॐ अप्रकाशाय नमः ॥

ॐ प्रकाशात्मने नमः ॥

ॐ घनाय नमः ॥

ॐ गगनभूषणाय नमः ॥

ॐ विधिस्तुत्याय नमः ॥ ६०

ॐ विशालाक्षाय नमः ॥

ॐ विद्वज्जनमनोहराय नमः ॥

ॐ चारुशीलाय नमः ॥

ॐ स्वप्रकाशाय नमः ॥

ॐ चपलाय नमः ॥

ॐ जितेन्द्रियाय नमः ॥

ॐ उदङ्मुखाय नमः ॥

ॐ मखासक्ताय नमः ॥

ॐ मगधाधिपतये नमः ॥

ॐ हरये नमः ॥ ७०

ॐ सौम्यवत्सरसंजाताय नमः ॥

ॐ सोमप्रियकराय नमः ॥

ॐ महते नमः ॥

ॐ सिंहाधिरूढाय नमः ॥

ॐ सर्वज्ञाय नमः ॥

ॐ शिखिवर्णाय नमः ॥

ॐ शिवंकराय नमः ॥

ॐ पीताम्बराय नमः ॥

ॐ पीतवपुषे नमः ॥

ॐ पीतच्छत्रध्वजाङ्किताय नमः ॥ ८०

ॐ खड्गचर्मधराय नमः ॥

ॐ कार्यकर्त्रे नमः ॥

ॐ कलुषहारकाय नमः ॥

ॐ आत्रेयगोत्रजाय नमः ॥

ॐ अत्यन्तविनयाय नमः ॥

ॐ विश्वपवनाय नमः ॥

ॐ चाम्पेयपुष्पसंकाशाय नमः ॥

ॐ चारणाय नमः ॥

ॐ चारुभूषणाय नमः ॥

ॐ वीतरागाय नमः ॥ ९०

ॐ वीतभयाय नमः ॥

ॐ विशुद्धकनकप्रभाय नमः ॥

ॐ बन्धुप्रियाय नमः ॥

ॐ बन्धुयुक्ताय नमः ॥

ॐ वनमण्डलसंश्रिताय नमः ॥

ॐ अर्केशाननिवासस्थाय नमः ॥

ॐ तर्कशास्त्रविशारदाय नमः ॥

ॐ प्रशान्ताय नमः ॥

ॐ प्रीतिसंयुक्ताय नमः ॥

ॐ प्रियकृते नमः ॥ १००

ॐ प्रियभूषणाय नमः ॥

ॐ मेधाविने नमः ॥

ॐ माधवसक्ताय नमः ॥

ॐ मिथुनाधिपतये नमः ॥

ॐ सुधिये नमः ॥

ॐ कन्याराशिप्रियाय नमः ॥

ॐ कामप्रदाय नमः ॥

ॐ घनफलाश्रयाय नमः ॥

॥ इति बुध अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of Mercury (Wednesday)

CHARITY: Donate small green lentils, a green pumpkin, a goat, or green clothes to a poor student on Wednesday at noon.

FASTING: On Wednesday, especially during Mercury transits and major or minor Mercury periods.

MANTRA: To be chanted on Wednesday, two hours after sunrise, especially during major or minor Mercury periods:

RESULT: The planetary diety Budha is propitiated increasing health and intelligence.

# ॥ बुधकवचम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीबुधकवचस्तोत्रमन्त्रस्य कश्यप ऋषिः,
अनुष्टुप् छन्दः, बुधो देवता, बुधप्रीत्यर्थं जपे विनियोगः ।

बुधस्तु पुस्तकधरः कुङ्कुमस्य समद्युतिः ।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥ १ ॥

कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा ।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥ २ ॥

घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम ।
कण्ठं पातु विधोः पुत्रो भुजौ पूस्तकभूषणः ॥ ३ ॥

वक्षः पातु वराङ्गश्च हृदयं रोहिणीसुतः ।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥ ४ ॥

जानुनी रौहिणेयश्च पातु जङ्घेऽखिलप्रदः ।
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥ ५ ॥

एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनं सर्वदुःखनिवारणम् ॥ ६ ॥

आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्धनम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ७ ॥

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

# ॥ बृहस्पतिस्तोत्रम् ॥

श्री गणेशाय नमः ।

अस्य श्रीबृहस्पतिस्तोत्रस्य गृत्समद ऋषिः, अनुष्टुप् छन्दः, बृहस्पतिर्देवता, बृहस्पतिप्रीत्यर्थं जपे विनियोगः ।

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः ।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥ १ ॥

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुराच्र्यः कुङ्मलद्युतिः ॥ २ ॥

लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः ।
तारापतिश्चाङ्गिरसो वेदवैद्यपितामहः ॥ ३ ॥

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः ॥ ४ ॥

जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ।
यः पूजयेद्गुरुदिने पीतगन्धाक्षताम्बरैः ॥ ५ ॥

पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ॥ ६ ॥

॥ इति श्रीस्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥

# ॥ श्री गुरु अष्टोत्तरशतनामावलिः ॥

## गुरु बीज मन्त्र -

## ॐ ग्राँ ग्रीं ग्रौं सः गुरवे नमः ॥

ॐ गुणाकराय नमः ॥

ॐ गोप्त्रे नमः ॥

ॐ गोचराय नमः ॥

ॐ गोपतिप्रियाय नमः ॥

ॐ गुणिने नमः ॥

ॐ गुणवतां श्रेष्थाय नमः ॥

ॐ गुरूणां गुरवे नमः ॥

ॐ अव्ययाय नमः ॥

ॐ जेत्रे नमः ॥

ॐ जयन्ताय नमः ॥

ॐ जयदाय नमः ॥

ॐ जीवाय नमः ॥

ॐ अनन्ताय नमः ॥

ॐ जयावहाय नमः ॥

ॐ आङ्गिरसाय नमः ॥

ॐ अध्वरासक्ताय नमः ॥

ॐ विविक्ताय नमः ॥

ॐ अध्वरकृत्पराय नमः ॥

ॐ वाचस्पतये नमः ॥

ॐ वशिने नमः ॥

ॐ वश्याय नमः ॥

ॐ वरिष्ठाय नमः ॥

ॐ वाग्विचक्षणाय नमः ॥

ॐ चित्तशुद्धिकराय नमः ॥

ॐ श्रीमते नमः ॥

ॐ चैत्राय नमः ॥

ॐ चित्रशिखण्डिजाय नमः ॥

ॐ बृहद्रथाय नमः ॥

ॐ बृहद्भानवे नमः ॥

ॐ बृहस्पतये नमः ॥

ॐ अभीष्टदाय नमः ॥

ॐ सुराचार्याय नमः ॥

ॐ सुराराध्याय नमः ॥

ॐ सुरकार्यकृतोद्यमाय नमः ॥

ॐ गीर्वाणपोषकाय नमः ॥

ॐ धन्याय नमः ॥

ॐ गीष्पतये नमः ॥

ॐ गिरीशाय नमः ॥

ॐ अनघाय नमः ॥

ॐ धीवराय नमः ॥

ॐ धिषणाय नमः ॥

ॐ दिव्यभूषणाय नमः ॥

ॐ देवपूजिताय नमः ॥

ॐ धनुर्धराय नमः ॥

ॐ दैत्यहन्त्रे नमः ॥

ॐ दयासाराय नमः ॥

ॐ दयाकराय नमः ॥

ॐ दारिद्र्यनाशनाय नमः ॥

ॐ धन्याय नमः ॥

ॐ दक्षिणायनसंभवाय नमः ॥

ॐ धनुर्मीनाधिपाय नमः ॥

ॐ देवाय नमः ॥

ॐ धनुर्बाणधराय नमः ॥

ॐ हरये नमः ॥

ॐ अङ्गिरोवर्षसंजताय नमः ॥

ॐ अङ्गिरःकुलसंभवाय नमः ॥

ॐ सिन्धुदेशाधिपाय नमः ॥

ॐ धीमते नमः ॥

ॐ स्वर्णकायाय नमः ॥

ॐ चतुर्भुजाय नमः ॥

ॐ हेमाङ्गदाय नमः ॥

ॐ हेमवपुषे नमः ॥

ॐ हेमभूषणभूषिताय नमः ॥

ॐ पुष्यनाथाय नमः ॥

ॐ पुष्यरागमणिमण्डलमण्डिताय नमः

ॐ काशपुष्पसमानाभाय नमः ॥

ॐ इन्द्राद्यमरसंघपाय नमः ॥

ॐ असमानबलाय नमः ॥

ॐ सत्त्वगुणसंपद्विभावसवे नमः ॥

ॐ भूसुराभीष्टदाय नमः ॥

ॐ भूरियशसे नमः ॥

ॐ पुण्यविवर्धनाय नमः ॥

ॐ धर्मरूपाय नमः ॥

ॐ धनाध्यक्षाय नमः ॥

ॐ धनदाय नमः ॥

ॐ धर्मपालनाय नमः ॥

ॐ सर्ववेदार्थतत्त्वज्ञाय नमः ॥

ॐ सर्वापद्विनिवारकाय नमः ॥

ॐ सर्वपापप्रशमनाय नमः ॥

ॐ स्वमतानुगतामराय नमः ॥

ॐ ऋग्वेदपारगाय नमः ॥

ॐ ऋक्षराशिमार्गप्रचारवते नमः ॥

ॐ सदानन्दाय नमः ॥

ॐ सत्यसंधाय नमः ॥

ॐ सत्यसंकल्पमानसाय नमः ॥

ॐ सर्वागमज्ञाय नमः ॥

ॐ सर्वज्ञाय नमः ॥

ॐ सर्ववेदान्तविदे नमः ॥

ॐ ब्रह्मपुत्राय नमः ॥

ॐ ब्राह्मणेशाय नमः ॥

ॐ ब्रह्मविद्याविशारदाय नमः ॥
ॐ समानाधिकनिर्मुक्ताय नमः ॥
ॐ सर्वलोकवशंवदाय नमः ॥
ॐ ससुरासुरगन्धर्ववन्दिताय नमः
ॐ सत्यभाषणाय नमः ॥
ॐ बृहस्पतये नमः ॥
ॐ सुराचार्याय नमः ॥
ॐ दयावते नमः ॥
ॐ शुभलक्षणाय नमः ॥

ॐ लोकत्रयगुरवे नमः ॥
ॐ श्रीमते नमः ॥
ॐ सर्वगाय नमः ॥
ॐ सर्वतो विभवे नमः ॥
ॐ सर्वेशाय नमः ॥
ॐ सर्वदातुष्टाय नमः ॥
ॐ सर्वदाय नमः ॥
ॐ सर्वपूजिताय नमः ॥

॥ इति गुरु अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of Jupiter (Thursday)

CHARITY: Donate a peepal sapling, saffron, turmeric, sugar, a horse, or yellow flowers to a brahmin (priest) on Thursday morning.

FASTING: On Thursday, especially during Jupiter transits and major or minor Jupiter periods.

MANTRA: To be chanted on Thursday, one hour before sunset, especially during major or minor Jupiter periods:

RESULT: The planetary diety Brihaspati is propitiated increasing satisfaction and facilitating marriage and childbirth.

# ॥ बृहस्पतिकवचम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीबृहस्पतिकवचस्तोत्रमन्त्रस्य ईश्वर ऋषिः,
अनुष्टुप् छन्दः, गुरुर्देवता, गं बीजं, श्रीशक्तिः,
क्लीं कीलकं, गुरुप्रीत्यर्थं जपे विनियोगः ।

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम् ।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम् ॥ १ ॥

बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः ।
कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥ २ ॥

जिह्वां पातु सुराचार्यो नासां मे वेदपारगः ।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवतागुरुः ॥ ३ ॥

भुजावाङ्गिरसः पातु करौ पातु शुभप्रदः ।
स्तनौ मे पातु वागीशः कुक्षिं मे शुभलक्षणः ॥ ४ ॥

नाभिं देवगुरुः पातु मध्यं पातु सुखप्रदः ।
कटिं पातु जगद्वन्द्य ऊरू मे पातु वाक्पतिः ॥ ५ ॥

जानुजङ्घे सुराचार्यो पादौ विश्वात्मकस्तथा ।
अन्यानि यानि चाङ्गानि रक्षेन्मे सर्वतो गुरुः ॥ ६ ॥

इत्येतत्कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान्कामानवाप्नोति सर्वत्र विजयी भवेत् ॥ ७ ॥

॥ इति श्रीब्रह्मयामलोक्तं बृहस्पतिकवचं सम्पूर्णम् ॥

# ॥ श्री शुक्र अष्टोत्तरशतनामावलिः ॥

## शुक्र बीज मन्त्र -

## ॐ द्राँ द्रीं द्रौं सः शुक्राय नमः ॥

ॐ शुक्राय नमः ॥

ॐ शुचये नमः ॥

ॐ शुभगुणाय नमः ॥

ॐ शुभदाय नमः ॥

ॐ शुभलक्षणाय नमः ॥

ॐ शोभनाक्षाय नमः ॥

ॐ शुभ्रवाहाय नमः ॥

ॐ शुद्धस्फटिकभास्वराय नमः ॥

ॐ दीनार्तिहरकाय नमः ॥

ॐ दैत्यगुरवे नमः ॥ १०

ॐ देवाभिवन्दिताय नमः ॥

ॐ काव्यासक्ताय नमः ॥

ॐ कामपालाय नमः ॥

ॐ कवये नमः ॥

ॐ कल्याणदायकाय नमः ॥

ॐ भद्रमूर्तये नमः ॥

ॐ भद्रगुणाय नमः ॥

ॐ भार्गवाय नमः ॥

ॐ भक्तपालनाय नमः ॥

ॐ भोगदाय नमः ॥ २०

ॐ भुवनाध्यक्षाय नमः ॥

ॐ भुक्तिमुक्तिफलप्रदाय नमः ॥

ॐ चारुशीलाय नमः ॥

ॐ चारुरूपाय नमः ॥

ॐ चारुचन्द्रनिभाननाय नमः ॥

ॐ निधये नमः ॥

ॐ निखिलशास्त्रज्ञाय नमः ॥

ॐ नीतिविद्याधुरंधराय नमः ॥

ॐ सर्वलक्षणसंपन्नाय नमः ॥

ॐ सर्वापद्गुणवर्जिताय नमः ॥ ३०

ॐ समानाधिकनिर्मुक्ताय नमः ॥

ॐ सकलागमपारगाय नमः ॥

ॐ भृगवे नमः ॥

ॐ भोगकराय नमः ॥

ॐ भूमिसुरपालनतत्पराय नमः ॥

ॐ मनस्विने नमः ॥

ॐ मानदाय नमः ॥

ॐ मान्याय नमः ॥

ॐ मायातीताय नमः ॥

ॐ महायशसे नमः ॥ ४०

ॐ बलिप्रसन्नाय नमः ॥

ॐ अभयदाय नमः ॥

ॐ बलिने नमः ॥

ॐ सत्यपराक्रमाय नमः ॥

ॐ भवपाशपरित्यागाय नमः ॥

ॐ बलिबन्धविमोचकाय नमः ॥

ॐ घनाशयाय नमः ॥

ॐ घनाध्यक्षाय नमः ॥

ॐ कम्बुग्रीवाय नमः ॥

ॐ कलाधराय नमः ॥ ५०

ॐ कारुण्यरससंपूर्णाय नमः ॥

ॐ कल्याणगुणवर्धनाय नमः ॥

ॐ श्वेताम्बराय नमः ॥

ॐ श्वेतवपुषे नमः ॥

ॐ चतुर्भुजसमन्विताय नमः ॥

ॐ अक्षमालाधराय नमः ॥

ॐ अचिन्त्याय नमः ॥

ॐ अक्षीणगुणभासुराय नमः ॥

ॐ नक्षत्रगणसंचाराय नमः ॥

ॐ नयदाय नमः ॥ ६०

ॐ नीतिमार्गदाय नमः ॥

ॐ वर्षप्रदाय नमः ॥

ॐ हृषीकेशाय नमः ॥

ॐ क्लेशनाशकराय नमः ॥

ॐ कवये नमः ॥

ॐ चिन्तितार्थप्रदाय नमः ॥

ॐ शान्तमतये नमः ॥

ॐ चित्तसमाधिकृते नमः ॥

ॐ आधिव्याधिहराय नमः ॥

ॐ भूरिविक्रमाय नमः ॥ ७०

ॐ पुण्यदायकाय नमः ॥

ॐ पुराणपुरुषाय नमः ॥

ॐ पूज्याय नमः ॥

ॐ पुरुहूतादिसन्नुताय नमः ॥

ॐ अजेयाय नमः ॥

ॐ विजितारातये नमः ॥

ॐ विविधाभरणोज्ज्वलाय नमः ॥

ॐ कुन्दपुष्पप्रतीकाशाय नमः ॥

ॐ मन्दहासाय नमः ॥

ॐ महामतये नमः ॥ ८०

ॐ मुक्ताफलसमानाभाय नमः ॥

ॐ मुक्तिदाय नमः ॥

ॐ मुनिसन्नुताय नमः ॥

ॐ रत्नसिंहासनारूढाय नमः ॥

ॐ रथस्थाय नमः ॥

ॐ रजतप्रभाय नमः ॥

ॐ सूर्यप्राग्देशसंचाराय नमः ॥

ॐ सुरशत्रुसुहृदे नमः ॥

ॐ कवये नमः ॥

ॐ तुलावृषभराशीशाय नमः ॥ ९०

ॐ दुर्धराय नमः ॥

ॐ धर्मपालकाय नमः ॥

ॐ भाग्यदाय नमः ॥

ॐ भव्यचारित्राय नमः ॥

ॐ भवपाशविमोचकाय नमः ॥

ॐ गौडदेशेश्वराय नमः ॥

ॐ गोप्त्रे नमः ॥

ॐ गुणिने नमः ॥

ॐ गुणविभूषणाय नमः ॥

ॐ ज्येष्ठानक्षत्रसंभूताय नमः ॥

ॐ ज्येष्ठाय नमः ॥

ॐ श्रेष्ठाय नमः ॥

ॐ शुचिस्मिताय नमः ॥

ॐ अपवर्गप्रदाय नमः ॥

ॐ अनन्ताय नमः ॥

ॐ सन्तानफलदायकाय नमः ॥

ॐ सर्वैश्वर्यप्रदाय नमः ॥

ॐ सर्वगीर्वाणगणसन्नुताय नमः ॥

॥ इति शुक्र अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of Venus (Friday)

CHARITY: Donate silk clothes, dairy cream, yogurt, scented oils, sugar, cow dung, or camphor to a poor young woman on Friday evening.

FASTING: On Friday, especially during Venus transits and major or minor Venus periods.

MANTRA: To be chanted on Friday at sunrise, especially during major or minor Venus periods:

RESULT: The planetary diety Shukra is propitiated increasing riches and conjugal bliss.

# ॥ शुक्रकवचम् ॥

श्रीगणेशाय नमः ।

मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रसृतमक्षमालिनम् ।
समस्तशास्त्रार्थविधिं महान्तं
ध्यायेत्कविं वाञ्छितमर्थसिद्धये ॥ १

ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः ।
नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः ॥ २ ॥

पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः ।
वचनं चोशनाः पातु कण्ठं श्रीकण्ठभक्तिमान् ॥ ३ ॥

भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः ।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥ ४ ॥

कटिं मे पातु विश्वात्मा उरू मे सुरपूजितः ।
जानुं जाड्यहरः पातु जङ्घे ज्ञानवतां वरः ॥ ५ ॥

गुल्फौ गुणनिधिः पातु पातु पादौ वराम्बरः ।
सर्वाण्यङ्गानि मे पातु स्वर्णमालापरिष्कृतः ॥ ६ ॥

य इदं कवचं दिव्यं पठति श्रद्धयान्वितः ।
न तस्य जायते पीडा भार्गवस्य प्रसादतः ॥ ७ ॥

॥ इति श्रीब्रह्माण्डपुराणे शुक्रकवचं सम्पूर्णम् ॥

# ॥ श्रीशनैश्चरमालामन्त्रः ॥

॥श्रीः ॥

अस्य श्रीशनैश्चरमालामन्त्रस्य काश्यप ऋषिः, अनुष्टुप् छन्दः,
शनैश्चरो देवता, शं बीजं, निं शक्तिः, मं कीलकं,
समस्तपीडा परिहारार्थे शनैश्चरप्रसादसिद्ध्यर्थे जपे विनियोगः ।
शनैश्चराय अङ्गुष्ठाभ्यां नमः, कृष्णवर्णाय तर्जनीभ्यां नमः,
सूर्यपुत्राय मध्यमाभ्यां नमः, मन्दगतये अनामिकाभ्यां नमः,
गृध्रवाहनाय कनिष्ठिकाभ्यां नमः,
पङ्गुपादाय करतल- करपृष्ठाभ्यां नमः, एवं हृदयादि न्यासः ॥

ध्यानम् ॥

दोर्भिर्धनुर्द्विशिखचर्मधरं त्रिशूलं
भास्वत्किरीटमुकुटोज्ज्वलितेन्द्रनीलम् ।
नीलातपत्रकुसुमादिसुगन्धभूषं देवं
भजे रविसुतं प्रणतोऽस्मि नित्यम् ॥

ॐ नमो भगवते शनैश्चराय मन्दगतये सूर्यपुत्राय महाकालाग्नि-
सदृशाय क्रूर (कृश) देहाय गृध्रासनाय नीलरूपाय चतुर्भुजाय
त्रिनेत्राय नीलाम्बरधराय नीलमालाविभूषिताय धनुराकारमण्डले

प्रतिष्ठिताय काश्यपगोत्रात्मजाय माणिक्यमुक्ताभरणाय छायापुत्राय सकलमहारौद्राय सकलजगत्भयङ्कराय पङ्कुपादाय क्रूररूपाय देवासुरभयङ्कराय सौरये कृष्णवर्णाय स्थूलरोमाय अधोमुखाय नीलभद्रासनाय नीलवर्णरथारूडाय त्रिशूलधराय सर्वजनभयङ्कराय मन्दाय दं, शं, नं, मं, हुं, रक्ष रक्ष, ममशत्रून्नाशय, सर्वपीडा नाशय नाशय, विषमस्थशनैश्चरान् सुप्रीणय सुप्रीणय, सर्वज्वरान् शमय शमय। समस्तव्याधीनामोचय मोचय विमोचय।

मां रक्ष रक्ष, समस्त दुष्टग्रहान् भक्षय भक्ष्य, भ्रामय भ्रामय, त्रासय त्र्रासय, बन्धय बन्धय, उन्मादयोन्मादय, दीपय दीपय, तापय तापय, सर्वविघ्नान् छिन्धि छिन्धि, डाकिनीशाकिनीभूतवेतालयक्षरक्षोगन्धर्वग्रहान् ग्रासय ग्रासय, भक्षय भक्षय, दह दह, पच पच, हन हन, विदारय विदारय, शत्रून् नाशय नाशय, सर्वपीडा नाशय नाशय, विषमस्थशनैश्चरान् सुप्रीणय सुप्रीणय।

सर्वज्वरान् शमय शमय।

समस्तव्याधीन् विमोचय विमोचय, ओं शं नं मं ह्रां फं हुं, शनैश्चराय नीलाभ्रवर्णाय नीलमेखलय सौरये नमः॥

# ॥ शनैश्चरस्तवराजः ॥

श्री गणेशाय नमः ॥

नारद् उवाच ॥

ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः ।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम ॥ १ ॥

शिरो में भास्करिः पातु भालं छायासुतोऽवतु ।
कोटराक्षो दृशौ पातु शिखिकण्ठनिभः श्रुती ॥ २ ॥

घ्राणं मे भीषणः पातु मुखं बलिमुखोऽवतु ।
स्कन्धौ संवर्तकः पातु भुजौ मे भयदोऽवतु ॥ ३ ॥

सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु ।
ग्रहराजः कटिं पातु सर्वतो रविनन्दनः ॥ ४ ॥

पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः ।
रक्षामेतां पठेन्नित्यं सौरेर्नामबलैर्युताम् ॥ ५ ॥

सुखी पुत्री चिरायुश्च स भवेन्नात्र संशयः ।
सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः ॥ ६ ॥

शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ।
शिखिकण्ठनिभो नीलश्छायाहृदयनन्दनः ॥ ७ ॥

कालदृष्टिः कोटराक्षः स्थूलरोमावलीमुखः ।
दीर्घो निर्मांसगात्रस्तु शुष्को घोरो भयानकः ॥ ८ ॥

नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः ।
मन्दो मन्दगतिः खंजो तृप्तः संवर्तको यमः ॥ ९ ॥

ग्रहराजः कराली च सूर्यपुत्रो रविः शशी ।
कुजो बुधो गुरूः काव्यो भानुजः सिंहिकासुतः ॥ १० ॥

केतुर्देवपतिर्बाहुः कृतान्तो नैऋतस्तथा ।
शशी मरूत्कुबेरश्च ईशानः सुर आत्मभूः ॥ ११ ॥

विष्णुर्हरो गणपतिः कुमारः काम ईश्वरः ।
कर्ता हर्ता पालयिता राज्यभुग् राज्यदायकः ॥ १२ ॥

छायासुतः श्यामलाङ्गो धनहर्ता धनप्रदः ।
क्रूरकर्मविधाता च सर्वकर्मावरोधकः ॥ १३ ॥

तुष्टो रूष्टः कामरूपः कामदो रविनन्दनः ।
ग्रहपीडाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ॥ १४ ॥

स्थिरासनः स्थिरगतिर्महाकायो महाबलः ।
महाप्रभो महाकालः कालात्मा कालकालकः ॥ १५ ॥

आदित्यभयदाता च मृत्युरादित्यनंदनः ।
शतभिद्रुक्षदयिता त्रयोदशितिथिप्रियः ॥ १६ ॥

तिथ्यात्मा तिथिगणनो  नक्षत्रगणनायकः ।
योगराशिर्मुहूर्तात्मा कर्ता दिनपतिः प्रभुः ॥ १७ ॥

शमीपुष्पप्रियः श्यामस्त्रैलोक्याभयदायकः ।
नीलवासाः क्रियासिन्धुर्नीलाञ्जनचयच्छविः ॥ १८ ॥

सर्वरोगहरो देवः सिद्धो देवगणस्तुतः ।
अष्टोत्तरशतं नाम्नां सौरेश्छायासुतस्य यः ॥ १९ ॥

पठेन्नित्यं तस्य पीडा समस्ता नश्यति ध्रुवम् ।
कृत्वा पूजां पठेन्मर्त्यो भक्तिमान्यः स्तवं सदा ॥ २० ॥

विशेषतः शनिदिने पीडा तस्य विनश्यति ।
जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे ॥ २१ ॥

दशासु च गते सौरे तदा स्तवमिमं पठेत् ।
पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ॥ २२ ॥

विधाय लोहप्रतिमां नरो दुःखाद्विमुच्यते ।
वाधा याऽन्यग्रहाणां च यः पठेत्तस्य नश्यति ॥ २३ ॥

भीतो भयाद्विमुच्येत बद्धो मुच्येत बन्धनात् ।
रोगी रोगाद्विमुच्येत नरः स्तवमिमं पठेत् ॥ २४ ॥

पुत्रवान्धनवान् श्रीमान् जायते नात्र संशयः ॥ २५ ॥

नारद उवाच ॥

स्तवं निशम्य पार्थस्य प्रत्यक्षोऽभूच्छनैश्चरः ।
दत्त्वा राज्ञे वरः कामं शनिश्चान्तर्दधे तदा ॥ २६ ॥

॥ इति श्री भविष्यपुराणे शनैश्चरस्तवराजः सम्पूर्णः ॥

# ॥ शनैश्चरस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

अस्य श्रीशनैश्चरस्तोत्रस्य । दशरथ ऋषिः । शनैश्चरो देवता ।
त्रिष्टुप् छन्दः ॥ शनैश्चरप्रीत्यर्थ जपे विनियोगः ।

दशरथ उवाच ॥

कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमन्दसौरिः ।
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय ॥ १ ॥

सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ २ ॥

नरा नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृङ्गाः ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ ३ ॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ ४ ॥

तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा ।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय ॥ ५ ॥

प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम् ।
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय ॥ ६

अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात् ।
गृहाद् गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय ॥ ७

स्रष्टा स्वयंभूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी ।
एकस्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्रीरविनन्दनाय ॥ ८ ॥

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च ।
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते ॥ ९ ॥

कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥ १० ॥

एतानि दश नामानि प्रातरुत्थाय यः पठेत् ।
शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥ ११ ॥

॥ इति श्रीब्रह्माण्डपुराणे श्रीशनैश्चरस्तोत्रं संपूर्णम् ॥

# ॥ श्री शनि अष्टोत्तरशतनामावलिः ॥

## शनि बीज मन्त्र -

## ॐ प्राँ प्रीं प्रौं सः शनैश्चराय नमः ॥

ॐ शनैश्चराय नमः ॥

ॐ शान्ताय नमः ॥

ॐ सर्वाभीष्टप्रदायिने नमः ॥

ॐ शरण्याय नमः ॥

ॐ वरेण्याय नमः ॥

ॐ सर्वेशाय नमः ॥

ॐ सौम्याय नमः ॥

ॐ सुरवन्द्याय नमः ॥

ॐ सुरलोकविहारिणे नमः ॥

ॐ सुखासनोपविष्टाय नमः ॥ १०

ॐ सुन्दराय नमः ॥

ॐ घनाय नमः ॥

ॐ घनरूपाय नमः ॥

ॐ घनाभरणधारिणे नमः ॥

ॐ घनसारविलेपाय नमः ॥

ॐ खद्योताय नमः ॥

ॐ मन्दाय नमः ॥

ॐ मन्दचेष्टाय नमः ॥

ॐ महनीयगुणात्मने नमः ॥

ॐ मर्त्यपावनपदाय नमः ॥ २०

ॐ महेशाय नमः ॥

ॐ छायापुत्राय नमः ॥

ॐ शर्वाय नमः ॥

ॐ शततूणीरधारिणे नमः ॥

ॐ चरस्थिरस्वभावाय नमः ॥

ॐ अचञ्चलाय नमः ॥

ॐ नीलवर्णाय नमः ॥

ॐ नित्याय नमः ॥

ॐ नीलाञ्जननिभाय नमः ॥

ॐ नीलाम्बरविभूशणाय नमः ॥

ॐ निश्चलाय नमः ॥

ॐ वेद्याय नमः ॥

ॐ विधिरूपाय नमः ॥

ॐ विरोधाधारभूमये नमः ॥

ॐ भेदास्पदस्वभावाय नमः ॥

ॐ वज्रदेहाय नमः ॥

ॐ वैराग्यदाय नमः ॥

ॐ वीराय नमः ॥

ॐ वीतरोगभयाय नमः ॥

ॐ विपत्परम्परेशाय नमः ॥ ४०

ॐ विश्ववन्द्याय नमः ॥

ॐ गृध्नवाहाय नमः ॥

ॐ गूढाय नमः ॥

ॐ कूर्माङ्गाय नमः ॥

ॐ कुरूपिणे नमः ॥

ॐ कुत्सिताय नमः ॥

ॐ गुणाढ्याय नमः ॥

ॐ गोचराय नमः ॥

ॐ अविद्यामूलनाशाय नमः ॥

ॐ विद्याविद्यास्वरूपिणे नमः ॥ ५०

ॐ आयुष्यकारणाय नमः ॥

ॐ आपदुद्धर्त्रे नमः ॥

ॐ विष्णुभक्ताय नमः ॥

ॐ वशिने नमः ॥

ॐ विविधागमवेदिने नमः ॥

ॐ विधिस्तुत्याय नमः ॥

ॐ वन्द्याय नमः ॥

ॐ विरूपाक्षाय नमः ॥

ॐ वरिष्ठाय नमः ॥
ॐ गरिष्ठाय नमः ॥ ६०
ॐ वज्राङ्कुशधराय नमः ॥
ॐ वरदाभयहस्ताय नमः ॥
ॐ वामनाय नमः ॥
ॐ ज्येष्ठापत्नीसमेताय नमः ॥
ॐ श्रेष्ठाय नमः ॥
ॐ मितभाषिणे नमः ॥
ॐ कष्टौघनाशकर्त्रे नमः ॥
ॐ पुष्टिदाय नमः ॥
ॐ स्तुत्याय नमः ॥
ॐ स्तोत्रगम्याय नमः ॥ ७०
ॐ भक्तिवश्याय नमः ॥
ॐ भानवे नमः ॥
ॐ भानुपुत्राय नमः ॥
ॐ भव्याय नमः ॥
ॐ पावनाय नमः ॥
ॐ धनुर्मण्डलसंस्थाय नमः ॥
ॐ धनदाय नमः ॥
ॐ धनुष्मते नमः ॥
ॐ तनुप्रकाशदेहाय नमः ॥
ॐ तामसाय नमः ॥ ८०
ॐ अशेषजनवन्द्याय नमः ॥
ॐ विशेशफलदायिने नमः ॥
ॐ वशीकृतजनेशाय नमः ॥
ॐ पशूनां पतये नमः ॥
ॐ खेचराय नमः ॥
ॐ खगेशाय नमः ॥
ॐ घननीलाम्बराय नमः ॥
ॐ काठिन्यमानसाय नमः ॥
ॐ आर्यगणस्तुत्याय नमः ॥
ॐ नीलच्छत्राय नमः ॥ ९०

ॐ नित्याय नमः ॥

ॐ निर्गुणाय नमः ॥

ॐ गुणात्मने नमः ॥

ॐ निरामयाय नमः ॥

ॐ निन्द्याय नमः ॥

ॐ वन्दनीयाय नमः ॥

ॐ धीराय नमः ॥

ॐ दिव्यदेहाय नमः ॥

ॐ दीनार्तिहरणाय नमः ॥

ॐ दैन्यनाशकराय नमः ॥ १००

ॐ आर्यजनगण्याय नमः ॥

ॐ क्रूराय नमः ॥

ॐ क्रूरचेष्टाय नमः ॥

ॐ कामक्रोधकराय नमः ॥

ॐ कलत्रपुत्रशत्रुत्वकारणाय नमः ॥

ॐ परिपोषितभक्ताय नमः ॥

ॐ परभीतिहराय नमः ॥

ॐ भक्तसंघमनोऽभीष्टफलदाय नमः

॥ इति शनि अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of Saturn (Saturday)

CHARITY: Donate leather, farm land, a black cow, a cooking oven with cooking utensils, a buffalo, black mustard or black sesamum seeds, to a poor man on Saturday evening.

FASTING: On Saturday during Saturn transits, and especially major or minor Saturn periods.

MANTRA: To be chanted on Saturday, two hours and forty minutes before sunrise, especially during major or minor Saturn periods:

RESULT: The planetary diety Shani is propitiated insuring victory in quarrels, over coming chronic pain, and bringing success to those engaged in the iron or steel trade.

## ॥ शनिवज्रपंजरकवचम् ॥

श्री गणेशाय नमः ॥

नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद् वरदः प्रशान्तः ॥ १

ब्रह्मा उवाच ॥

शृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ २ ॥

कवचं देवतावासं वज्रपंजरसंज्ञकम् ।
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ३ ॥

ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनन्दनः ।
नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः ॥ ४ ॥

नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।
स्निग्धकण्ठश्च मे कण्ठं भुजौ पातु महाभुजः ॥ ५ ॥

स्कन्धौ पातु शनिश्चैव करौ पातु-शुभप्रदः ।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा ॥ ६ ॥

नाभिं ग्रहपतिः पातु मन्दः पातु कटिं तथा ।

ऊरू ममान्तकः पातु यमो जानुयुगं तथा ॥ ७ ॥

पदौ मन्दगतिः पातु सर्वांगं पातु पिप्पलः ।

अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥ ८ ॥

इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।

न तस्य जायते पीडा प्रीतो भवति सूर्यजः ॥ ९ ॥

व्यय-जन्म-द्वितीयस्थो मृत्युस्थानगतोऽपि वा ।

कलत्रस्थो गतो वाऽपि सुप्रीतस्तु सदा शनिः ॥ १० ॥

अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे ।

कवचं पठते नित्यं न पीडा जायते क्वचित् ॥ ११ ॥

इत्येतत्कवचं दिव्यं सौरेर्यन्निर्मितं पुरा ।

द्वादशाऽष्टमजन्मस्थदोषान्नाशयते सदा ।

जन्मलग्नस्थितान् दोषान् सर्वान्नाशयते प्रभुः ॥ १२ ॥

॥ इति श्री ब्रह्माण्डपुराणे ब्रह्म-नारदसंवादे
शनिवज्रपंजरकवचम् सम्पूर्णम् ॥

# ॥ श्री राहु अष्टोत्तरशतनामावलिः ॥

## राहु बीज मन्त्र -

## ॐ भ्राँ भ्रीं भ्रौं सः राहवे नमः ॥

ॐ राहवे नमः ॥

ॐ सैंहिकेयाय नमः ॥

ॐ विधुन्तुदाय नमः ॥

ॐ सुरशत्रवे नमः ॥

ॐ तमसे नमः ॥

ॐ फणिने नमः ॥

ॐ गार्ग्यनयाय नमः ॥

ॐ सुरापिने नमः ॥

ॐ नीलजीमूतसंकाशाय नमः ॥

ॐ चतुर्भुजाय नमः ॥ १०

ॐ खड्गखेटकधारिणे नमः ॥

ॐ वरदायकहस्तकाय नमः ॥

ॐ शूलायुधाय नमः ॥

ॐ मेघवर्णाय नमः ॥

ॐ कृष्णध्वजपताकावते नमः ॥

ॐ दक्षिणाशामुखरथाय नमः ॥

ॐ तीक्ष्णदंष्ट्रकरालकाय नमः ॥

ॐ शूर्पाकारसंस्थाय नमः ॥

ॐ गोमेदाभरणप्रियाय नमः ॥

ॐ माषप्रियाय नमः ॥ २०

ॐ कश्यपर्षिनन्दनाय नमः ॥

ॐ भुजगेश्वराय नमः ॥

ॐ उल्कापातयित्रे नमः ॥

ॐ शूलिने नमः ॥

ॐ निधिपाय नमः ॥

ॐ कृष्णसर्पराजे नमः ॥

ॐ विषज्वलावृतास्याय -

- अर्धशरीराय नमः ॥

ॐ शात्रवप्रदाय नमः ॥

ॐ रवीन्दुभीकराय नमः ॥

ॐ छायास्वरूपिणे नमः ॥ ३०

ॐ कठिनाङ्गकाय नमः ॥

ॐ द्विषच्चक्रच्छेदकाय नमः ॥

ॐ करालास्याय नमः ॥

ॐ भयंकराय नमः ॥

ॐ क्रूरकर्मणे नमः ॥

ॐ तमोरूपाय नमः ॥

ॐ श्यामात्मने नमः ॥

ॐ नीललोहिताय नमः ॥

ॐ किरीटिणे नमः ॥

ॐ नीलवसनाय नमः ॥ ४०

ॐ शनिसमान्तवर्त्मगाय नमः ॥

ॐ चाण्डालवर्णाय नमः ॥

ॐ अश्व्यर्क्षभवाय नमः ॥

ॐ मेषभवाय नमः ॥

ॐ शनिवत्फलदाय नमः ॥

ॐ शूराय नमः ॥

ॐ अपसव्यगतये नमः ॥

ॐ उपरागकराय नमः ॥

ॐ सोमसूर्यच्छविविमर्दकाय नमः ॥

ॐ नीलपुष्पविहाराय नमः ॥ ५०

ॐ ग्रहश्रेष्ठाय नमः ॥

ॐ अष्टमग्रहाय नमः ॥

ॐ कबन्धमात्रदेहाय नमः ॥

ॐ यातुधानकुलोद्भवाय नमः ॥

ॐ गोविन्दवरपात्राय नमः ॥

ॐ देवजातिप्रविष्टकाय नमः ॥

ॐ क्रूराय नमः ॥

ॐ घोराय नमः ॥
ॐ शनेर्मित्राय नमः ॥
ॐ शुक्रमित्राय नमः ॥ ६०
ॐ अगोचराय नमः ॥
ॐ माने गङ्गास्नानदात्रे नमः ॥
ॐ स्वगृहे प्रबलाढ्यदाय नमः ॥
ॐ सद्गृहेऽन्यबलधृते नमः ॥
ॐ चतुर्थे मातृनाशकाय नमः ॥
ॐ चन्द्रयुक्ते चण्डाल -
- जन्मसूचकाय नमः ॥
ॐ सिंहजन्मने नमः ॥
ॐ राज्यदात्रे नमः ॥
ॐ महाकायाय नमः ॥
ॐ जन्मकर्त्रे नमः ॥ ७०
ॐ विधुरिपवे नमः ॥
ॐ मादकज्ञानदाय नमः ॥
ॐ जन्मकन्याराज्यदात्रे नमः ॥
ॐ जन्महानिदाय नमः ॥
ॐ नवमे पितृहन्त्रे नमः ॥
ॐ पञ्चमे शोकदायकाय नमः ॥
ॐ द्यूने कलत्रहन्त्रे नमः ॥
ॐ सप्तमे कलहप्रदाय नमः ॥
ॐ षष्ठे वित्तदात्रे नमः ॥
ॐ चतुर्थे वैरदायकाय नमः ॥ ८०
ॐ नवमे पापदात्रे नमः ॥
ॐ दशमे शोकदायकाय नमः ॥
ॐ आदौ यशः प्रदात्रे नमः ॥
ॐ अन्ते वैरप्रदायकाय नमः ॥
ॐ कालात्मने नमः ॥
ॐ गोचराचाराय नमः ॥
ॐ धने ककुत्प्रदाय नमः ॥
ॐ पञ्चमे धिशणाशृङ्गदाय नमः ॥

ॐ स्वर्भानवे नमः ॥

ॐ बलिने नमः ॥ ९०

ॐ महासौख्यप्रदायिने नमः ॥

ॐ चन्द्रवैरिणे नमः ॥

ॐ शाश्वताय नमः ॥

ॐ सुरशत्रवे नमः ॥

ॐ पापग्रहाय नमः ॥

ॐ शाम्भवाय नमः ॥

ॐ पूज्यकाय नमः ॥

ॐ पाटीरपूरणाय नमः ॥

ॐ पैठीनसकुलोद्भवाय नमः ॥

ॐ भक्तरक्षाय नमः ॥ १००

ॐ राहुमूर्तये नमः ॥

ॐ सर्वाभीष्टफलप्रदाय नमः ॥

ॐ दीर्घाय नमः ॥

ॐ कृष्णाय नमः ॥

ॐ अतनवे नमः ॥

ॐ विष्णुनेत्रारये नमः ॥

ॐ देवाय नमः ॥

ॐ दानवाय नमः ॥

॥ इति राहु अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of raahu (Saturday)

CHARITY: Donate a coconut, old coins or coal to a leper on Saturday.

FASTING: On the first Saturday of the waxing moon, especially during major or minor raahu periods.

MANTRA: To be chanted on Saturday, two hours after sunset, especially during major or minor raahu periods:

RESULT: The planetary diety raahu is propitiated granting victory over enemies, favour from the King or government, and reduction in diseases caused by raahu.

# ॥ राहुकवचम् ॥

श्रीगणेशाय नमः ।

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।
सैंहिकेयं करालास्यं लोकानामभयप्रदम् ॥ १ ॥

नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः ।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरिरवान् ॥ २ ॥

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम ।
जिह्वां मे सिंहिकासूनुः कण्ठं मे कठिनाङ्घ्रिकः ॥ ३ ॥

भुजङ्गेशो भुजौ पातु नीलमाल्याम्बरः करौ ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥ ४ ॥

कटिं मे विकटः पातु ऊरू मे सुरपूजितः ।
स्वर्भानुर्जानुनी पातु जङ्घे मे पातु जाड्यहा ॥ ५ ॥

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।
सर्वाण्यङ्गानि मे पातु नीलचन्दनभूषणः ॥ ६ ॥

राहोरिदं कवचमृद्धिदवस्तुदं यो
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्य
मात्मविजयं च हि तत्प्रसादात् ॥ ७ ॥

॥ इति श्रीमहाभारते धृतराष्ट्रसञ्जयसंवादे
द्रोणपर्वणि राहुकवचं सम्पूर्णम् ॥

# ॥ राहुस्तोत्रम् ॥

श्री गणेशाय नमः ।

राहुर्दानवमन्त्री च सिंहिकाचित्तवन्दनः ।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ॥ १ ॥

रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः ।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥ २ ॥

कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रयः ।
विधुन्तुदः सैंहिकेयो घोररूपो महाबलः ॥ ३ ॥

ग्रहपीडाकरो दंष्ट्री रक्तनेत्रो महोदरः ।
पञ्चविंशतिनामानि स्मृत्वा राहुं सदा नरः ॥ ४ ॥

यः पठेन्महती पीडा तस्य नश्यति केवलम् ।
आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥ ५ ॥

ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम् ।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥ ६ ॥

॥ इति श्रीस्कन्दपुराणे राहुस्तोत्रं सम्पूर्णम् ॥

# ॥ श्री केतु अष्टोत्तरशतनामावलिः ॥

## केतु बीज मन्त्र -

## ॐ स्राँ स्रीं स्रौं सः केतवे नमः ॥

ॐ केतवे नमः ॥

ॐ स्थूलशिरसे नमः ॥

ॐ शिरोमात्राय नमः ॥

ॐ ध्वजाकृतये नमः ॥

ॐ नवग्रहयुताय नमः ॥

ॐ सिंहिकासुरीगर्भसंभवाय नमः ॥

ॐ महाभीतिकराय नमः ॥

ॐ चित्रवर्णाय नमः ॥

ॐ श्रीपिङ्गलाक्षकाय नमः ॥

ॐ फुल्लधूम्रसंकाषाय नमः ॥ १०

ॐ तीक्ष्णदंष्ट्राय नमः ॥

ॐ महोदराय नमः ॥

ॐ रक्तनेत्राय नमः ॥

ॐ चित्रकारिणे नमः ॥

ॐ तीव्रकोपाय नमः ॥

ॐ महासुराय नमः ॥

ॐ क्रूरकण्ठाय नमः ॥

ॐ क्रोधनिधये नमः ॥

ॐ छायाग्रहविशेषकाय नमः ॥

ॐ अन्त्यग्रहाय नमः ॥ २०

ॐ महाशीर्षाय नमः ॥

ॐ सूर्यारये नमः ॥

ॐ पुष्पवद्ग्राहिणे नमः ॥

ॐ वरहस्ताय नमः ॥

ॐ गदापाणये नमः ॥

ॐ चित्रवस्त्रधराय नमः ॥

ॐ चित्रध्वजपताकाय नमः ॥
ॐ घोराय नमः ॥
ॐ चित्ररथाय नमः ॥
ॐ शिखिने नमः ॥ ३०
ॐ कुलुत्थभक्षकाय नमः ॥
ॐ वैडूर्याभरणाय नमः ॥
ॐ उत्पातजनकाय नमः ॥
ॐ शुक्रमित्राय नमः ॥
ॐ मन्दसखाय नमः ॥
ॐ गदाधराय नमः ॥
ॐ नाकपतये नमः ॥
ॐ अन्तर्वेदीश्वराय नमः ॥
ॐ जैमिनिगोत्रजाय नमः ॥
ॐ चित्रगुप्तात्मने नमः ॥ ४०
ॐ दक्षिणामुखाय नमः ॥
ॐ मुकुन्दवरपात्राय नमः ॥
ॐ महासुरकुलोद्भवाय नमः ॥
ॐ घनवर्णाय नमः ॥
ॐ लम्बदेवाय नमः ॥
ॐ मृत्युपुत्राय नमः ॥
ॐ उत्पातरूपधारिणे नमः ॥
ॐ अदृश्याय नमः ॥
ॐ कालाग्निसंनिभाय नमः ॥
ॐ नृपीडाय नमः ॥ ५०
ॐ ग्रहकारिणे नमः ॥
ॐ सर्वोपद्रवकारकाय नमः ॥
ॐ चित्रप्रसूताय नमः ॥
ॐ अनलाय नमः ॥
ॐ सर्वव्याधिविनाशकाय नमः ॥
ॐ अपसव्यप्रचारिणे नमः ॥
ॐ नवमे पापदायकाय नमः ॥
ॐ पंचमे शोकदाय नमः ॥

ॐ उपरागखेचराय नमः ॥
ॐ अतिपुरुषकर्मणे नमः ॥ ६०
ॐ तुरीये सुखप्रदाय नमः ॥
ॐ तृतीये वैरदाय नमः ॥
ॐ पापग्रहाय नमः ॥
ॐ स्फोटककारकाय नमः ॥
ॐ प्राणनाथाय नमः ॥
ॐ पञ्चमे श्रमकारकाय नमः ॥
ॐ द्वितीयेऽस्फुटवग्दात्रे नमः ॥
ॐ विषाकुलितवक्त्रकाय नमः ॥
ॐ कामरूपिणे नमः ॥
ॐ सिंहदन्ताय नमः ॥ ७०
ॐ कुशेध्मप्रियाय नमः ॥
ॐ चतुर्थे मातृनाशाय नमः ॥
ॐ नवमे पितृनाशकाय नमः ॥
ॐ अन्त्ये वैरप्रदाय नमः ॥
ॐ सुतानन्दन्निधनकाय नमः ॥
ॐ सर्पाक्षिजाताय नमः ॥
ॐ अनङ्गाय नमः ॥
ॐ कर्मराश्युद्भवाय नमः ॥
ॐ उपान्ते कीर्तिदाय नमः ॥
ॐ सप्तमे कलहप्रदाय नमः ॥ ८०
ॐ अष्टमे व्याधिकर्त्रे नमः ॥
ॐ धने बहुसुखप्रदाय नमः ॥
ॐ जनने रोगदाय नमः ॥
ॐ ऊर्ध्वमूर्धजाय नमः ॥
ॐ ग्रहनायकाय नमः ॥
ॐ पापदृष्टये नमः ॥
ॐ खेचराय नमः ॥
ॐ शाम्भवाय नमः ॥
ॐ अशेषपूजिताय नमः ॥
ॐ शाश्वताय नमः ॥ ९०

ॐ नटाय नमः ॥

ॐ शुभाशुभफलप्रदाय नमः ॥

ॐ धूम्राय नमः ॥

ॐ सुधापायिने नमः ॥

ॐ अजिताय नमः ॥

ॐ भक्तवत्सलाय नमः ॥

ॐ सिंहासनाय नमः ॥

ॐ केतुमूर्तये नमः ॥

ॐ रवीन्दुद्युतिनाशकाय नमः ॥

ॐ अमराय नमः ॥ १००

ॐ पीडकाय नमः ॥

ॐ अमर्त्याय नमः ॥

ॐ विष्णुदृष्टाय नमः ॥

ॐ असुरेश्वराय नमः ॥

ॐ भक्तरक्षाय नमः ॥

ॐ वैचित्र्यकपटस्यन्दनाय नमः ॥

ॐ विचित्रफलदायिने नमः ॥

ॐ भक्ताभीष्टफलप्रदाय नमः ॥

॥ इति केतु अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥

Propitiation of Ketu (Thursday)

CHARITY: Donate a brown cow with white spots, colored blankets, or a dog to a poor young man on Thursday.

FASTING: On the first Thursday of the waxing moon, especially during major or minor Ketu periods.

MANTRA: To be chanted on Thursday at midnight, especially during major or minor Ketu periods:

RESULT: The planetary diety Ketu is propitiated granting victory over enemies, favour from the King or government, and reduction in diseases caused by Ketu.

# ॥ केतुकवचम् ॥

श्रीगणेशाय नमः ।
केतुं करालवदनं चित्रवर्णं किरीटिनम् ।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥ १ ॥

चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः ।
पातु नेत्रे पिङ्गलाक्षः श्रुती मे रक्तलोचनः ॥ २ ॥

घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः ।
पातु कण्ठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥ ३ ॥

हस्तौ पातु सुरश्रेष्ठः कुक्षिं पातु महाग्रहः ।
सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥ ४ ॥

ऊरू पातु महाशीर्षो जानुनी मेऽतिकोपनः ।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिङ्गलः ॥ ५ ॥

य इदं कवचं दिव्यं सर्वरोगविनाशनम् ।
सर्वशत्रुविनाशं च धारणाद्विजयी भवेत् ॥ ६ ॥

॥ इति श्रीब्रह्माण्डपुराणे केतुकवचं सम्पूर्णम् ॥




श्री नवग्रह यंत्र




BUDHA PRAYER
SUKRA PRAYER
CHANDRA PRAYER
GURU PRAYER
ADITYA PRAYER
KUJA PRAYER
RAHU PRAYER
SANI PRAYER
KETHU PRAYER


Lord Mercury
9 4 11
10 8 6
5 12 7
Lord Venus
11 6 13
12 10 8
7 14 9
Lord Moon
7 2 9
8 6 4
3 10 5
Lord Jupiter
10 5 12
11 9 7
6 13 8
Lord Sun
6 1 8
7 5 3
2 9 4
Lord Mars
8 3 10
9 7 5
4 11 6
Lord Ketu
14 9 16
15 13 11
10 17 12
Lord Saturn
12 7 14
13 11 9
8 15 10
Lord Rahu
13 8 15
14 12 10
9 16 11



॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

तत्सद् ब्रह्मार्पणमस्तु । यद्भद्रम् तन्म आसुव ॥

*Book Compiled By Shri N K Venkitaraman.*

[ For a free copy of printable PDF file write to nkv.nvr@gmail.com]